एक परिचय –

आर्जुनमालाकारम् (हिन्दी अनुवाद सहित)

यह एक अङ्गुलीमाल जैसे क्रूर आततायी अर्जुनमाली का इतिवृत्त है जो किसी घटना विशेष से क्रुद्ध हो कर यक्ष की सहायता से निरन्तर छः पुरुष एवं एक स्त्री को मारा करता था। उसने यह उत्पात पाँच महीने तेरह दिन तक मचाया, अन्त में भगवान महावीर के दर्शनार्थ जाते हुए निर्भीक सुदर्शन श्रेष्ठी के दर्शन-मात्र से इसका यक्षावेश दूर हुआ और वह भगवान महावीर का शिष्य बन गया।

कथा शिक्षाप्रद और रुचिकर है। उक्त काव्य दो भागों में विभक्त है, प्रारंभ में मूल संस्कृत और अन्त में उसका सरल हिन्दी अनुवाद है जो संस्कृत न जानने वालों के लिये भी उपयोगी है।

उपदेशामृतम् (हिन्दी अनुवाद सहित)

लगभग सात सौ श्लोकों का यह एक शिक्षात्मक ग्रन्थ है, जिसमें अनेक दैनन्दिन जीवन व्यवहारों के साथ अहिंसा, सत्य, ब्रह्मचर्य आदि सद्गुणों को अपनाने की प्रेरणा है। संस्कृत भाषा सुबोध एवं सुग्राह्य है।

ज्योतिःस्फुलिंगाः (केवल संस्कृत)

यह एक लघु निबन्धों का संकलन है। विद्यार्थियों के लिये विशेष उपयोगी है। ये ज्योतिःस्फुलिङ्ग जीवन को आलोकित करने में सक्षम हैं।

इस प्रकार ये तीन काव्य ग्रन्थ विज्ञजनों के सम्मुख प्रस्तुत हैं जिसके रचयिता विद्वान श्री चन्दन मुनि हैं जो अणुव्रत अनुशास्ता आचार्य श्री तुलसी के नेतृत्व में संयम साधना के साथ-साथ सत्साहित्य सृजन में संलग्न हैं। इन काव्यों को उपयोग में लाना विज्ञजनों का काम है। कहा है – "सूतेऽम्भः कमलानि तत्परिमलं वाता वितन्वन्ति यत्"

अर्थात् – जल कमलों को पैदा करता है, किन्तु उनकी परिमल दिग्विभागों में पवन प्रसारित करता है।

अतः आप प्रत्येक ग्रन्थों का सावधान मनन करेंगे और यथार्थ अपनी सम्मति अवश्य प्रदान करेंगे ऐसी आशा है।

प्रस्तुत पुस्तकों का सेट माननीय श्री शा० माणकचन्दजी सियाल सुत श्री शा० भूरचन्दजी सियाल, दी सेन्ट्रल इलेक्ट्रिक कारपोरेशन, ५०१, एवेन्यु रोड, बेंगलोर सिटी ने अपनी परम पूज्यनीया मातुश्री स्वर्गीय पतासी बाई (धर्मपत्नी शा भूरचन्दजी सियाल) की पावन स्मृति में भेंट स्वरूप प्रदान की हैं।

द्वारा — छाजेर प्रकाशन
शान्ति-भवन, ६४ ए. एम. लेन,
चिकपेट, बेंगलोर-२ए.

आर्जुनमालाकारम्

(गद्यकाव्यम्)

साहित्य-निकाय व्यवस्थापक

श्री चन्दन मुनिः

आर्जुनमालाकारम्

(गद्यकाव्यम्)

(हिन्दी भाषानुवादसंवलितम्)

लेखक :

साहित्यनिकाय-व्यवस्थापक :

श्री चन्दन मुनिः

अनुवादक :

समाजभूषण श्री छोगमल चोपड़ा

बी० ए०, एल-एल० बी०

प्रकाशक :

श्री रामलाल हंसराज गोलछा

बिराटनगर (नेपाल)

पुस्तक
आर्जुनमालाकारम्
(गद्यकाव्यम्)

अनुवादक
समाजभूषण श्री छोगमलजी
चौपड़ा B.A., LL.B.

व्यवस्था निर्देशक
छाजेड़ प्रकाशन
श्री ताराचन्दजी छाजेड़
बेंगलोर

प्रबन्धक
श्री मोतीलाल पारख
श्री ब्रह्मदेवसिंह

अर्थ-सौजन्य
श्री रामलाल हंसराज गोलछा
विराटनगर (नेपाल)

प्रथम संस्करण
जनवरी
१९६९

प्राप्ति स्थल

रामलाल हंसराज गोलछा
द्वारा
हुलास मेटल क्राफ्ट प्रा० लि०
विराटनगर (नेपाल)

छाजेड़ प्रकाशन
शांति भवन
६४ ए० एम० लैन
चिकपैठ, बेंगलोर-२ A

रामलाल हंसराज गोलछा
रतनगढ (राजस्थान)

मोतीलाल पारख
श्यामसुखा हाउस,
ऊठों का चौक, बीकानेर

मुद्रक
प्रेम इलैक्ट्रिक प्रेस
१/११ महात्मा गांधी मार्ग
आगरा-२

मूल्य
तीन रुपया

समर्पणम्

जीवन-साधनाया अमरसहयोगिनां
पितृचरणानां
श्री केवलचन्द्रस्वामिनां
चरणारविन्देषु

प्रकाशक के दो शब्द

* साहित्य वही है, जो व्यक्ति, समाज और राष्ट्र के लिए परम हित-कारी सिद्ध हो। ऐसा अमूल्य साहित्य, भारतीय संस्कृति में आत्मदर्शी ऋषि-मुनियों ने समय-समय पर जिज्ञासु-जनों को दिया, जिसके द्वारा दिग्भ्रान्त व्यक्तियों को दिशा-संकेत मिला, अज्ञानावृतचेतना को सद्ज्ञान की उप-लब्धि हुई और उत्कृष्ट अध्यात्म-भावना जागृत हुई।

* प्रस्तुत रचना भी एक चिन्तनशील, अध्यात्म-योगी, साधनारत, साहित्यकार मुनि श्रीचन्दनमलजी की अमरकृति है, जो वर्षों से संयम-साधना के साथ-साथ साहित्य-सेवा भी कर रहे हैं।

* अप्रणत अनुशास्ता आचार्य श्री तुलसी के शासनकाल में तेरापंथ संघ में सार्वजनीन, बहुमुखी, उच्चस्तरीय साहित्य का निर्माण द्रुतगति से चल रहा है और प्रकाश में भी आ रहा है। आगम-संशोधन जैसा भगीरथ कार्य भी गतिमान् बन रहा है। उसमें सहयोग प्रदान करना हम श्रावकों का भी पुनीत कर्त्तव्य है।

* 'आर्जुनमालाकारम्' जैसी गंभीर साहित्य-कृतियों का भाव मेरे जैसे व्यवसायरत व्यक्ति के लिए समझ पाना व हृदयंगम कर लेना सम्भव नहीं लगता। फिर भी ऐसा सुन्दर एवं उपयोगी साहित्य मेरे यत्किंचित् सहयोग से विद्वानों, पाठकों तक पहुँच पाए, इसी में मेरी आत्मतुष्टि व श्रम सार्थकता है; क्योंकि सत्साहित्य को प्रकाश में लाना "अर्थ और श्रम का सदुपयोग है" ऐसी मेरी मान्यता है।

* सहयोगात्मक दृष्टिकोण से प्रस्तुतकाव्य का हिन्दी भाषानुवाद समाजभूषण श्री छोगमलजी चोपड़ा B.A., LL.B. ने किया है, जो श्री जैनश्वेताम्बर तेरापंथी महासभा, कलकत्ता के वर्षों तक मंत्री व अध्यक्ष पद को अलंकृत करते रहे हैं। जिनकी सादगी, प्रामाणिकता, कर्त्तव्य-निष्ठा तथा व्यवहार-पटुता सराहनीय होने के साथ-साथ हमारे लिए अनुकरणीय भी है। यद्यपि आपका संस्कृत व हिन्दी अध्ययन बंगाल प्रान्त में शिक्षा-ग्रहण करने के कारण बंगालीभाषा के माध्यम से ही हुआ है, फिर भी संस्कृतग्रन्थों के विशेष अध्ययन से आप उनका भावार्थ सहज ही हृदयंगम कर लेने में सक्षम हैं। सम्बोधि आदि कतिपय संस्कृत ग्रन्थों का भाषान्तर हिन्दी तथा अंग्रेजी में आपने बड़ी सरलता से किया है। वर्तमान समय में आपकी आयु लगभग पचासी वर्ष की है। ऐसे कठिन काल में भी आपके उत्साह और क्रियाशीलता को देखकर महान् आश्चर्य होता है।

* बंगाली-मिश्रित आपकी हिन्दी भाषा को न्यायतीर्थ श्री शोभाचन्द्रजी 'भारिल्ल' (जो विशाल साहित्य का सम्पादन कर चुके हैं) के अंगुली-स्पर्श ने एक ऐसा निखार ला दिया है, जो पाठकों को अनुवाद-सा प्रतीत न होकर एक स्वतन्त्र-काव्यग्रन्थ-सा लगता है। अतः इन महानुभावों के श्रम का हृदय से स्वागत करता हुआ मैं कृतज्ञता ज्ञापन करता हूं।

छाजेर-प्रकाशन के व्यवस्थापक उत्साही कार्यकर्ता श्री ताराचन्द जी छाजेर (बेंगलोर) धारक, श्री सोहनलालजी चण्डालिया (राजलदेसर), प्रबन्धक श्री मोतीलाल जी पारख (बीकानेर) व श्री ब्रह्मदेवसिंहजी (गौड़े-प्रतापगढ़) का सहयोग विशेष प्रशंसनीय रहा है। मुद्रण-व्यवस्था में विशेष सहयोग प्रदान करने वाले श्री श्रीचन्दजी सुराना 'सरस' (आगरा) ने अत्यन्त सावधानी व मनोयोगपूर्वक इस पुस्तक के हर पहलू को सुन्दर व आकर्षक बनाया है। उन्हे शतशः साधुवाद देता हुआ प्रसन्नता का अनुभव कर रहा हूं।

—रामलाल हंसराज गोलछा

१ जनवरी, १९६९
विराटनगर (नेपाल)

इतो विंशतिवर्षेभ्यः पूर्वं यदाऽहमासं पञ्चापप्रान्ते[1] विहरमाणः। नाभा-नगरे सुखां प्रावृषेण्यां स्थितिं प्रपूर्य सानन्दं समाणा-स्पर्शनं विधाय पट्वालय-पुरं[2] प्राप्तवान्। हेमन्तं तारुण्यमानयमानो हिमालयसन्निधानतः प्रालेयपात-दुस्सहो दीर्घत्रियामः सहस्यो[3] मासस्तदानीम्। अप्राप्तबहुपरिचयास्तत्रत्या जनाः, तेन न संकुलता प्रायः श्रावकाणाम्। सुतरां लब्धाऽवकाशेन मया प्रारब्धमस्तब्धकाव्य-निर्माणम्। भूरिपरिश्रमेण सुविहितपाठस्मरणं नवीनमासीद् मदीयं व्याकरणं पाठनेन पुनः। सुस्पष्टघोषो निर्दोषः कोषोऽपि स्मृतिपटमलङ्करिष्णुः। अनेक-नव्यानव्यभव्यकाव्यावगाहनेन अधिहृदयं प्रवहमानाः समुज्ज्वलाः साहित्यरस-धाराः। प्रारब्धं झगिति तद् विलसद् विशदभावतति गतिमासदद् निष्प्रत्यूहम्। चलिता प्रातः सायं लेखनी विलम्बमसहमाना। पूर्तिमापन् पृष्ठानामुपरि पृष्ठानि, तेन सावकाशाः समुच्छ्वासा अपि समुच्छ्वसिताः समजनिषत। नूनं तन्मयता-माराधयता मया एतत्काव्यं निर्मितिमानीतम्। विरचितदेशीयेऽस्मिन् काव्ये सहसा समभवद् गमनमस्माकमुपाचार्यपादं स्थलीप्रदेशे माघमहे। पुनस्ततो विहरता अजेयमेरु[4]-परिसरे परिभ्रमता काव्यमिदं पूर्तिमानीतम्। उत्तरोत्तरं मन्निर्मिता या गद्यकाव्यत्रयी तत्र पौरस्त्यमिदं प्रकृतम्।

१—पंजाब प्रान्त २—पटियाला ३—पौषमासः ४—अजमेर

नात्र निगूढशब्दशाम्बरी-कादम्बरीवद् विसंकटसैरन्ध्रीपटवितलानि, अतुच्छ-समासविन्यासदुरधिगमानि, प्रतिपदमभिनवश्लेषविशेषक्लिष्टानि, नवनवोपमाना-समानभावभासुराणि, अप्रतिमबुद्धिवैभवसमभ्यसनीयानि च प्रकरणानि । अत्र तु सहसाऽल्पमतिवेद्यनिरवद्यपदावलिविलसितानि, प्रस्फुरत्प्रत्ययप्रवैयाकरणप्रयोग-प्रोन्मिषितानि, नानापर्यायवाचिसंज्ञासंकेतितानि, धार्मिक-सामाजिक-नीतिप्रतीति-प्रोन्मीलितानि नातिविशालानि वर्णनानि । तेनेह अध्येता प्रलम्बारण्याध्वनि ससाध्वसं प्रवर्तमानाऽध्वग इव न गमनखेदमनुभविष्यति, प्रत्युत सुग्राह्यगम्य-पदानि सहसाऽऽत्मसात्कुर्वाणोऽग्रेसरतां प्रतिपत्स्यतेतरां निःसंशयम् ।

विशेषतः—इदानीन्तने युगे विचित्रचलचित्रप्रेक्षणचञ्चलचेतसाम्, उद्-भवद्विकारशृङ्गाररसप्रधानगानैकरसिकानाम्, कुमारी-कुमाराणां सहाध्यायः प्रायो महाविद्यालयादिषु । तेषां पुरतोऽभिज्ञानशाकुन्तल-कुमारसम्भवादिमहा-काव्यानां तात्पर्याविर्भावयद् भृशं काठिन्यमनुभवतितरां अपत्रपिष्णु मानसमध्या-पकमहोदयानाम् । तत्रजागर्ति स्वयमेवैतादृशाना काव्यानां प्रबलतमाऽपेक्षा, येषु स्पष्टमुल्लसति सात्त्विकी प्रवृत्तिः, तात्त्विकी चर्चा, सदाचारनिष्ठा, कर्तव्यबोध , माहात्म्यमहिंसायाः, हिंसाया वैकल्य च; तेनविस्मृतप्राया समीचीना प्राचीना भारतीय-संस्कृतिर्लब्धप्रतिष्ठा स्यात् । गैर्वाणीं वाणीमध्येतुकामाश्छात्रास्तदव-बोधेन साकं लभेरन् जीवनोपयोगिपाठमपि । तादृशी पूर्तिश्चेदनेन काव्येनांशतोऽपि संभविष्यति तर्हि मम श्रमेणाऽवश्यमीषदुपकृतमिति मंस्यते मामकं चेतः ।

पुनरत्र वर्षीयसा समाजभूषणोपाधिविभूषितेन श्री छोगमलजिच्चोपडा-महोदयेन यदनुदितं सरलहिन्दीभाषायां काव्यमिदम्, तत. संस्कृतभाषाऽनभिज्ञा अप्यस्य वीरतोपजीविकथानकस्य रसं पातु प्रत्यला भविष्यन्ति, तेन साधारण-जनेष्वपि भावीदं पुस्तकमवश्यमुपयोगीति आशास्ते ।

सं० २०२५ पौषकृष्णद्वितीयायाम्
मैसूर प्रान्तान्तर्गते बेंगलूर नगरे

—चन्दनमुनिः

भूमिका

आर्जुनमालाकारम् इतिनामकमेतत्काव्यं जैनवाङ्मये सुप्रसिद्धस्य 'अर्जुन' इत्यभिधस्य मालाकारस्य आख्यानेन सम्बद्धं विद्यते। काव्यकर्तुः संस्कृतभाषानिबद्धमेतत् प्रथममेव गद्यकाव्यमस्ति। अस्य निर्मितिः पञ्चोत्तर द्विसहस्रपरिमिते विक्रमाब्दे समजनि। शिक्षार्थिनां शिक्षण-प्रक्रियायां सहयोगं दातुकामेन कवयित्रा निरमायि काव्यमेतद। अस्य प्रशस्ति-श्लोकेषु कविः स्वयमभिव्यनक्ति "कृतः श्रमोऽयं तदनुग्रहेण, लघीयसां बोधविवृद्धिहेतोः।"

काव्यकारो श्री चन्दनमुनिः प्रतिभा-विभा-विभासित-व्यक्तित्वेन सम्पन्नश्चकास्ति। स्वयं साधनाप्रियत्वात् तत्काव्य-प्रतिभापि तदध्यानमेवानुसरेदिति नास्वाभाविकम्। अयमेव हेतुर्यन्निज-भावाभिव्यक्तये स किमपि शृङ्गाररसप्रधानमाख्यानं विहाय शान्तरसमूलकमध्यात्मभावसंभृतमाख्यानमेवार्चैषीत्। अस्यां काव्य-निर्मितौ कविना पुराण-परम्पराया स नियमो न मानितो यस्यानुसारं काव्यस्य नायकेन केनचिल्लोक-प्रसिद्धेन, उच्चकुलोद्भवेन धीरोदात्तेनैव नरेण भवितव्यम्। अस्य काव्यस्य नायकोऽस्ति एकोऽतिसाधारणो जनः अर्जुन नामधेयो मालाकारः।

'संसर्गजा दोष गुणा भवन्ति' प्रथमस्य काव्यस्य मूलस्वरोऽस्तीति वक्तुं पार्यते। यच्च; एकस्या अघटनीयघटनाया आघातेनाहतोऽर्जुनः समग्रां मानवजातिं प्रति विद्रोहिभावमापन्नः प्रतिदिनं सप्तजनव्यापादन-संकल्पजाल-जटिलमानसः समजनि। स एव च कालान्तरे अन्यघटनाप्रभाव-प्रेरितः प्रतिःबुद्ध सन् भगवतो महावीरस्य शिष्यत्वमुरीकृत्य अहिंसासाधनानिरतः स्वपरकल्याणहेतुरभूत्। अनेन एतदपि सुस्पष्टीभवति यत् मनोरपस्यानां पतनोत्थाने अनन्तसंभावनासंकुलिते स्तः। ततो निश्चप्रचमेतन्निगदितुमवकाशोऽस्ति यत् पतनगर्त्तावर्त्ते बंभ्रम्यमाणस्यापि पुंसः पुनरुत्थानावसरस्य समुज्ज्वलाशा न कदाचिदपि धूमाविला भवितुं शक्यते।

काव्यशब्देन साकं प्रायः पद्यात्मकताया बोधो बलात् संयुज्यते, परन्तु गीर्वाण-गिरि पद्यात्मकानामिव गद्यात्मकानामपि काव्यानामविच्छिन्ना परम्परा विराजते। "गद्यं कवीनां निकषं वदन्ति" इति समुल्लेखेन विबुध-भारती-विशारदाः कवि-निकषत्वेन पद्यतोऽपि गद्यं बहु अमसत। मुनिप्रवरेण गद्य-काव्य-परम्परा यत्राग्रे नीता तत्र सुर-भारती-भाण्डागारश्रीरपि विवर्द्धिता। सुतरां सर्वथा स्तुत्योऽसौ प्रयासः। विद्यार्थिवर्गः स्वयमनेन समुचितलाभान्वितो भविष्यतीति विश्वसिमि।

वि० सं० २०२५ पौषशुक्लसप्तम्याम्
तेरापंथ भवने, मद्रासनगरे

—मुनि-बुद्धमल्लः

भूमिका (हिन्दी)

'आर्जुनमालाकारम्' नामक यह काव्य जैन वाङ्मय में सुप्रसिद्ध अर्जुन नामक मालाकार के आख्यान से सम्बद्ध है। काव्यकार का संस्कृत भाषा में निबद्ध यह प्रथम गद्यकाव्य है जो कि वि० सं० २००५ मे बनाया गया था। उन्होने यह काव्य लघु शिक्षार्थियों की शिक्षण-प्रक्रिया में सहयोग देने की भावना से प्रेरित होकर बनाया है। काव्य की पूर्ति पर प्रशस्तिश्लोक लिखते हुए वे स्वय कहते हैं—"कृतः श्रमोऽयं तदनुग्रहेण लघीयसां बोध-विवृद्धिहेतोः"

काव्यकार मुनि श्री चंदनमलजी एक प्रतिभा-सपन्न व्यक्ति हैं। वे स्वयं साधना-प्रिय हैं, अतः उनकी काव्य-प्रतिभा भी उसी मार्ग का अनुसरण करे यह स्वाभाविक है। यही कारण है कि उन्होंने अपनी भावाभिव्यक्ति के लिए किसी शृंगार प्रधान आख्यान को नही चुनकर शान्तरसमूलक आध्यात्मिक आख्यान को ही चुना। उन्होंने इस काव्य-निर्माण में प्राचीन परंपरा के उस नियम को मान्य नहीं किया है, जिसके अनुसार काव्य का नायक कोई लोक-प्रसिद्ध, उच्चकुलोद्भव और धीरोदात्त व्यक्ति ही होना चाहिये। इस काव्य का नायक एक अतिसाधारण अर्जुन नामक माली है।

'संसर्गजा दोष गुणा भवन्ति' यह इस काव्य का मूल स्वर कहा जा सकता है। एक घटना विशेष के प्रभाव से अर्जुन समग्र मानवजाति के प्रति विद्रोही बन बैठा। प्रतिदिन सात व्यक्तियों को मार गिराने का महान् हिंसक संकल्प उसके मन में बद्धमूल हो गया। कालान्तर में दूसरी घटना के प्रभाव से वह प्रतिबुद्ध हुआ और भगवान् महावीर का शिष्य बनकर अहिंसा-धर्म की साधना करता हुआ स्व-पर कल्याण का हेतु बन गया। इससे यह भी सुस्पष्ट हो जाता है कि व्यक्ति के पतन और उत्थान की अनंत संभावनाएँ है। तो फिर यह सुनिश्चित है कि पतित हो जाने पर भी मनुष्य के पुनः उत्थान की उज्ज्वल आशा कभी धूमिल नहीं हो पाती।

काव्य शब्द के साथ प्रायः पद्यात्मकता का बोध जुड़ जाया करता है, परन्तु संस्कृत भाषा में पद्यात्मक काव्यों के समान गद्यात्मक काव्यों की परंपरा भी रही है। 'गद्यं कवीनां निकषं वदन्ति' कहकर संस्कृत-मनीषियों ने कवि की कसौटी के रूप में पद्य को नहीं, गद्य को मान्य किया है। मुनिश्री ने गद्यकाव्य की परंपरा को जहाँ आगे बढाया है, वहाँ संस्कृत-भारती के भंडार की भी श्री-वृद्धि की है। मुनिश्री का यह प्रयास अत्यन्त स्तुत्य है। विद्यार्थी इससे समुचित लाभ उठायेंगे—ऐसा विश्वास करता हूँ।

वि० सं० २०२५ पौष शुक्ला ७
तेरापंथ भवन, मद्रास

—मुनि बुद्धमल्ल

निर्देशिका

आर्जुनमालाकारम्

(गद्यकाव्यम्)

साहित्य-निकाय व्यवस्थापकः

श्री चन्दन मुनिः

प्रथमः समुच्छ्वासः

मङ्गलाचरणम्

शमरसपरिपूर्णाऽमुद्रितोन्निद्रदृष्टि[1],
सकलभयविमुक्ता निश्चला ध्यानमुद्रा।
भवतु जिनपतीनां बद्धपद्मासनानां,
भवदव-दरितानां देहिनां शान्तिदात्री ॥१॥

प्रतिवचनपटिष्ठा सूक्ष्मतत्त्वैकनिष्ठा,
व्यपगतभयकोपा नव्यदृष्टान्तदक्षा।
अनुसृतजिनवाक्या भूरिसन्देहहर्त्री,
जयतु जयतु[2] भिक्षोर्बुद्धिरौत्पातिकी सा ॥२॥

शीर्षे करं प्रेमयुतं ददान,
ईषद्धसामाकृतिमादधानः।
"मूर्खो न वेत्तीति" वचो ब्रुवाणः,
पायात्सदा कालुगणेश्वरो माम् ॥३॥

---

१. उन्निद्राचासौदृष्टिश्च उन्निद्रदृष्टिः, आ-ईषन्मुद्रिता उन्निद्रदृष्टिर्यस्यां सा ध्यानमुद्रा।

२. भिक्षुस्वामिनः।

या हृद्हिमाद्रेश्चलिता नितान्त-
प्रसन्नवैराग्यजलेन पूर्णा ।
पुनातु दुर्णीतिमलं हरन्ती,
वाग्जाह्नवीयं तुलसीप्रभूणाम् ॥४॥

"अचिन्तनीयो महतां प्रभावः"
शोश्रूयते सूक्तिरियं बुधानाम् ।
सा[1] सत्यतां याति च वस्तुतोऽपि,
जनेषु तद्भासित-भावनेषु ॥५॥

किं वस्तुजातं वसुधातलेऽस्मिन्,
विभाति यन्नो महतां प्रभावात् ।
आविर्भवेद् भव्यहृदां पुरस्तात्,
महत्प्रभावः खलु कल्पवृक्षः ॥६॥

पापीयसामग्रसरा[2] नृशंसा, नितान्तहत्याऽरुणपाणियुग्माः ।
भवन्ति ते विश्वजनीनवृत्ता, महीयसां शासनमाश्रयन्तः ॥७॥

अर्जुनमालाकारः स्वागमविदितो निदर्शनं चात्र ।
तदेवाधिकृत्येदं, काव्यं निर्माम्यिह तनुधीः ॥८॥

किं विद्वन्मान्यानां, हृदयग्राही परिश्रमो भावी ।
इति न मया निर्णेयं,भवेत्स्वतन्त्रा हि शिशुलीला ॥९॥

कथारम्भः

"राजा प्रकृतिरञ्जनात्"—इति रघुवंशे ।

आसीदशेषदेशशेखरायमाणो भरतक्षेत्रान्तवर्ती मगधो नाम जनपदः । तत्र विविधाऽभ्रंलिहसौधश्रेणिभिर्वर्धमानश्रीकम्, नानावाणिज्य-विज्ञवणिग्जनवर्गविस्तृतव्यापारम्, अभिभूतधनदविभवभाग्य-शालिभूरिविभूतिमद्भिर्निभृतं भृतम् सुदृढवप्रगोपुरखातिका -

---

१. सूक्तिः ।

२. अग्रमग्रेण वा सरतीत्यग्रेसरः सूत्रेऽग्रे इति एदन्तमपि निपात्यते, कथं तर्हि—'यूथं तदग्रसरगर्वितकृष्णसारम्' इति, बहुलकादिति हरदत्तः ।

प्रभृतिभिर्विगताराभयम्, [1]दविष्ठनीवृदागतैरनेकक्रयिकविक्रयिकैः सङ्कुलापणमालम्, विशुद्धाज्यमधुधूलिसमितादिनिष्पन्नैर्विविधस्वादुमिष्ठान्नैः संकीर्णकान्दविकहट्टम्, इतस्ततोबम्भ्रम्यमाणैः कतिपयपण्याजीवैः संततशब्दायमानम्, मर्त्यलोकेऽपि स्वर्गलोकसदृक्षं जैनागमप्रसिद्धं राजगृहं नाम नगरं वसुमतीमस्तकमभूषयत्। तस्मिन् हरिरिवाऽखण्डितशासनः, केसरीवाक्षुण्णशौर्यधरः, अर्यमेव दुर्धृष्यदीधितिः, शशीव सौम्यमूर्त्तिः, गीर्पतिरिव विद्योदधिपारगः, भीष्म इव सुदृढप्रतिज्ञः, रत्नसानुरिव रणनिष्कम्पचरणः, कल्पशाखीव दानशौण्डीरः, मितद्रुरिवाऽनतिक्रान्तमर्यादः, नन्दनन्दन इव राजनीतिकुशलः, कमलवन्निर्मलविचारचुम्बिहृदयः, प्रभातसमय इव प्रबोधकोविदः, वासन्तपवन इव जगदानन्दकारी, गङ्गाप्रवाह इव निर्धूतकल्मषः, अयनानोकह[2] इव श्रान्ताश्रयणीयः, नभस्वानिव स्वतन्त्रविचारः, हिमवानिव सीमाकारकः, श्रेणिको नाम राजा प्रजा अन्वशात्। स नृपोऽभयोऽपि कृतपापभयः, सदयोऽपि दुष्टदण्डने निर्दयः, सहिष्णुरपि अन्यायमसहिष्णुः, अगर्वोऽपि धृतनीतिगर्वः, नितान्तविक्रान्तोऽपि परपीडाकातरः, प्रजापतिरपि प्रजासेवकः, सुखोचितोऽपि परिश्रमपरः, कोपप्रसादयोः स्वतन्त्रोऽपि पुनाराजनीतिपरतन्त्र. सकलैर्जनैरन्वभावि।

पुनः स प्रजास्वनुशासनं न स्वौद्धत्येन विदधे, किन्तु कर्तव्यमुररीकुर्वाणः, प्रजाभ्यो दण्डराजदेयादिद्रव्यं गृह्णन्नपि न स्वकीयोपभोगसामग्रीं विवृद्धिमानिन्ये, किन्तु तत् प्रत्युपकाराय प्रजानां व्ययाञ्चक्रे। बहुधा स परिवर्तितवेषो निशीथिन्यां नगरस्य त्रिकचच्चरादिषु पाणिन्धमान्धकारव्याप्तासु संकीर्णवीथिष्वपि चाज्ञातमटाट्यमानः स्वकीयमयशः श्रोतुमुत्सेहे। कदाचिदात्मीयमस्तोकं श्लोकमाकर्ण्यापि न जहर्ष, किन्तु आत्मानं निगूहमानो केनचित् व्याजेन कामपि त्रुटिं प्रकटयन् जनैः सार्धमुल्ललाप। कस्यचिन्मुखात् कामपि दोषागाथामाकलय्यापि न तस्मै चुक्रोध, किन्तु तद्रहस्यालोचनवशंवदो बभूव।

समये-समये संसत्सु भाषमाणः स इत्थमुदीरयन्नासीत् "प्रजामनुकूलयन् खलु कुशलो महीपालश्चिराय नन्दति, नहि प्रजां प्रतिकूलयन्। प्रजानुमतं हि शासनं प्रतिदिनमेधते, नहि प्रजातिरस्कृतं केवलं

---

१. अतिदूरदेशागतैः।

२. मार्गपादप इव।

नृपाभिमतम् । प्रजा हि जीवनं राज्ञाम्, प्रजा हि मूलं राज्यस्य, प्रजाभिरेवाऽऽलाप्यो भवति सम्मानसूचकैरिन्द्रनाथादिशब्दैः । न स्मर्यते किमु प्रथमः क्ष्मापतिरादीश्वरो विनीतावास्तव्यैरेव योग्यो निर्वाचितः ? नावबुध्यते किमुत पिशितलोलुपः शिशुभक्षणपरः सौदासः प्रजाभिरेव निर्वासितः शीघ्रमयोध्यातः । किं बहुना प्रजापालनमेव राज्ञां धर्मः, नहि प्रजा शोषणं किन्तु । किञ्चिदसमवहिते हि राजन्यनेकेऽनर्थाः समुद्भवन्ति राष्ट्रेषु, भूरय उपप्लवा अनुभूयन्ते तत्रत्यैः, प्रतिपलं संशेरते जनानामन्तःकरणानि, विलीयन्ते च सर्वेऽपि प्रकृतीनां कल्पितमनोरथाः, क्षीयन्ते प्रतिपद संपदः" सततमतः सावधानेन वसुमतीपतिना भाव्यम् ।

निगदन्ति नीतिकोविदा अपि इदमेव—"धर्मपरे राज्ञि सर्वा दिशो भवन्ति प्रजानां कामदुघाः, निःसंशयं मोदन्ते मनुजानां मानसानि, स्वातन्त्र्यमनुभवन्ति चत्वारोऽपि वर्णाः, ऋतवो नातिक्रामन्ति स्वमार्तवं धर्मम्, विलसति शस्यश्यामला राजन्वती[1] वसुधा, गृहे-गृहे राजन्ते नैचिक्यो गावः[2], संकीर्णानि स्युर्गृहमेधिनां प्राङ्गणानि पुत्र-पौत्रवृन्दैः, परेषां पतितमपि स्वापतेयं स्वीकर्तुं नोत्सहन्ते मर्त्याः, मातर इव महीयन्ते तत्राऽपरमहिलाः, साधु सम्मान्यन्ते महनीयवृत्ता मुनयः, अनुलङ्घ्यमामनन्ति गुरुजनवचनप्राकारं लघीयांसः, शुभ्रं विभ्राजते तत्र सौभ्रात्रं प्रेम, नहि भर्तृमात्रा सार्धं कलहायन्ते कुलवध्वः, सत्क्रियन्ते गृहागताऽतिथयः, नहि स्यात् तत्र चौर-पारदारिक-वञ्चक-पश्यतोहराणां च प्रायिकोऽवकाशः" इत्यादिसूक्तैः सामाजिकान् परितोषयति स्म सः ।

पुनः स भम्भासारो भगवतां चतुस्त्रिंशदतिशयैरतिशयितानाम्, पञ्चत्रिंशद्गीर्गुणैर्विशदव्याख्यानानाम्, काममिथ्यात्वाज्ञानप्रमुखैरष्टादशदोषैरप्रेक्ष्यमाणानाम्, व्यापाद्य मोहमहाराजमासादितकेवलकमलानाम्, सुरासुरनरेन्द्रसमूहैः प्रणतांह्रिसरोरुहाम्, इन्द्रभूत्यादिमुमुक्षुहर्यक्षैः चन्दनबालादिसतीमतल्लिकाभिश्च सभक्ति समुपास्यमानानाम्, श्रीवर्धमानस्वामिनामन्तेवासी, अभिगतजीवाजीवादितत्त्वः, व्यवसितद्रव्यषट्कसुन्दररहस्यः, विरचितव्रताव्रतविवेचनः,

---

१. "राजन्वान् सुराज्ञि" इति वतुप्रत्ययः ।

२. "नैचिकी तूत्तमा गोषु" इति हैमः ।

सावद्यनिरवद्योपादानद्वयेन सुज्ञातानुकम्पाद्वैविध्यः, अनवरतं वैपरीत्यवृत्तितः प्रतिपन्नसंसृतिनिर्वृतिपथपार्थक्यः, 'पात्रापात्रविवेचक-सर्पसौरभेयीनिदर्शनेन विशदीकृतवितरणविवेकः, सुनिश्चितनिर्जरा-नुगतपुण्यप्रचयः, सुविलोडितनयन्यासप्रमाणकल्लोललोल-स्याद्वादवारांनिधिः, चतुर्थगुणस्थानस्थायी श्राद्धश्चासीत् । देवाधिदेव-मेव स देवत्वेनाऽऽनर्च, नहि रागद्वेषादिपङ्ककलङ्कितान् निग्रहानुग्रह-कारकान् भूयो-भूयो भूभारमाहर्तुं धृतावतारान् सततं सपत्नीकान् अन्ययूथिकदेवान् । षट्त्रिंशद् गुणगुणैरगम्यगौरवम्, बाह्याभ्यन्तर-ग्रन्थिविप्रमुक्तम्, हृदयान्धतमसविनाशने मार्तण्डमण्डलायितम्, भवाम्बुधौ निमज्जतां जन्तूनां निस्तारणे पोतायितम्, परमपवित्राचारं गुरुं गुरुधिया निषेवते स्म सः । अर्हन्मुखारविन्दादाविर्भूतम्, अनेक-जन्मजन्मान्तरसञ्चितकलुषकलापकर्तनकुशलम्, भवदावदंदह्यमानदेह-भृद्रक्षादक्षम्, शरणमशरणानाम्, बन्धुमबन्धूनाम्, धनं दरिद्राणाम्, स्थानं बम्भ्रम्यमाणानाम्, सुखं दुःखाकुलानाम्, सहायमसहायानाम्, अभयं भयद्रुतानाम्,बलं निर्बलानाम्, अमृतं म्रियमाणानाम्, राजपथ-मज्ञातनिगमानाम्,[2] भैषज्यमामयाविनाम्, मित्रं शून्यहृदयानाम्, परम-मङ्गलम्, अहिंसामयम्, विनयमूलम्, त्यागप्राधान्यम्[3], जिनाज्ञान्तर्गतम्, संवरनिर्जरात्मकम्, ध्रुवम्, सार्वजनिकम्, दुर्गतिनिपतज्जन्तुजात-धारणक्षमम्, धर्मं निश्चलधिया श्रद्दधे स सुतराम् ।

इमां परमानर्घ्यां परमात्मनीनां परब्रह्मसाधनीं रत्नत्रयीं परमभक्त्याऽऽराधयन्तं शङ्काकाङ्क्षादिदोषैरदुष्टं शमसंवेगादि-तल्ल-क्षणैर्वलक्षं क्षायिकसम्यक्त्वं परिपालयन्तं, धर्मानुरागरक्ताऽस्थिमज्जं तं नृपं परिपक्वप्रत्ययं नहि निर्जरोऽपि धर्माच्चालयितुं शशाक स्वप्ना-वस्थास्वपि ।

शचीव दुश्च्यवनस्य[4], रोहिणीव हिमद्युतेः, रतिरिव मधुसारथेः, श्रीदेवीव सार्वभौमस्य, तस्य राज्ञोऽवरोधमलञ्चक्रे चिल्लणानाम्नी महिषी । सा स्वकीयाऽलौकिकललितलावण्येन, विलसत्सौन्दर्य-

---

१. 'पात्रापात्रविभेदोऽस्ति, धेनु०' इत्यादि ।

२. अविदितमार्गाणाम् ।

३. त्यागेन प्राधान्यं-प्रधानत्वं यस्य तम् ।

४. इन्द्रस्य ।

वितततारुण्येन जहास कात्यायनीमपि[1]। सा साध्वीमचर्च्चिका पातिव्रत्यपरायणा पराबभूव परिप्लवां कण्टकाकुलपदां पद्मवासामपि। सा चतुःषष्ठीकलाकोविदा विविधकाव्यालङ्कारनदीष्णाता अनेकसूक्तिपद्यमुखरितमुखारविन्दा इतिहासपुराणनाटकादिभेदविदुषी शारदामपि च समुन्निन्ये विवदितुम्। पुनः सा चेटकनृपपुत्रीत्वात्परमार्हती जन्मतोऽप्यार्यदेवार्याणां शिष्या हृदयङ्गमीकृतनवतत्त्वसत्त्वा नितान्तमदोलायितमानसा परमश्रद्धया सुतरां सिषेवे श्रेष्ठां जैनीं दृष्टिम्। पूर्वं भर्त्रा बहूपद्रुताया अपि असत्याऽनाय[2]न्यासेन निजिघृक्षिताया[3] अपि, नानाजटिलपर्यनुयोगैः प्रत्यहमनुयोजिताया अपि, कृत्रिमजैनमुनिगर्हया जुगुप्सां नीताया अपि, नानाकपटघटनया विप्रतारिताया अपि च तस्या नहि चकम्पे खल्वेकापि रोमराजी जैनदर्शनतः। नहीषदपि समशयिष्ट[4] स्वान्तमपि चार्हन्त्यविचारधारासु, प्रत्युत सा पतिमपि पारगतपथं प्रति प्रणेतुं प्रयतितवती। मिथ्यात्वाद्यरातीन् चञ्चज्ज्ञानचन्द्रहासेन खण्डितुमुच्चण्डचण्डीरूपमादर्शितवती। नैयायिके पथि निःसंकोचमाव्रजन्ती वाचंयमचेलानामेजयाञ्चक्रे[5] चेतांस्यपि तद्विचारधाराभिः सह। अन्ते सा चारुचारित्रमूर्तिः सुसंप्राप्तसाफल्या विजिग्ये[6] निजं भर्त्तारमपि स्याद्वादवाद्यध्वन्यध्वनीनं तं पूर्णरूपेण प्रेक्षमाणा। अस्तु, दाम्पत्यप्रेम्णा औचितीमनतिक्रामन्तौ राजनीतिकुशलावपि दत्तधर्मैकलक्ष्यौ जगतां पुरत उच्चमादर्शमादर्शयन्तौ सीतारामचन्द्राविवाऽपरौ जनैरतर्किषाताम्।

तस्य राज्ञः केवलबुद्धिपरमाणभिरिव वेधसा रचितः, पिण्डीभूतो विवेकोऽथवा विनिर्मितनराकृतिः, जगद्वैचित्रीं दिदृक्षुरथवा धिषणो[7] धरातले धृतावतारः, द्विकरोऽपि सहस्रकर इव मार्गनिर्देष्टा,

---

१. "कात्यायनी त्वर्धवृद्धा" इति वचनाद् हास्यास्पदं सा।

२ अनाय-जालम्।

३. निग्रहीतुमिष्टाया अपि।

४. संशेतेस्म।

५. कुत्सिता वाचंयमा वाचयमचेलास्तेषाम्।

६. विपराभ्या जेरित्यात्मने पदम्।

७. बृहस्पतिः।

द्व्यक्षोऽपि सहस्राक्ष इवातिदूरदर्शी, एकशीर्षोऽपि सहस्रशीर्ष[1] इव परामर्शपटुः, मुखविकारकराभिनयाभ्यामपि मनःस्थमप्यर्थमभ्यूहयितुं प्रवणः, प्रतिध्वानेनापि परमन्त्ररहस्यनिष्कर्षनिपुणः, आयवृद्धि व्ययौचितीं स्वामिरक्षणं तन्त्रपोषणं च कर्तुं नितान्तविचाराधीनः, साम-दाम-दण्ड-भेद-नीतिकुशलः, कोशं वर्धयन्नपि नहि प्रजारक्तशोषणोद्यतः, प्रियंवदतया हितमुदीरयन् नहि चाटुकारत्ववशंवदः, नहि स्वार्थान्धतया स्तोकमपि राज्ञोऽनर्थं सहिष्णुः, परमधार्मिकः पवित्राचरणः, प्रेयानगृध्नुर्नन्दातनुजोऽभयकुमारनामा धीसखो[2] निर्भयं राज्यभारं बभार ।

यस्य बुद्धिवैलक्षण्यं विलोक्य सुदृढं चातुरङ्गिकवाहिनीबलमाभेजाना अपि प्रत्यवस्थातारः[3] पृथ्वीपालाः श्रेणिकशासनाद् नितरामाशशङ्किरे। येन चतुर्विधया धिया एतादृशान्यपूर्वाणि स्वप्नेप्यसम्भावनीयानि कार्याणि निरमायिषत, यैः प्रत्यर्थिभिः कल्पिताः परःशतमनोरथा अभ्रविलायं विलीनाः । तेषां हृदये चेदृक चाकचिक्यमाविर्भावितम् यन्नूनमयमतुच्छबुद्धिविभवः कुशाग्रीयमतिर्यावदभयकुमारोऽमात्यप्रवरः सुखं विराजतेतराम् तावन्नेदं शासनं पाकशासनस्थाम्नापि[4] सपत्नेन विजेतुं शक्यम् । भम्भासारोऽपि तादृशं मन्त्रिणं पुत्रमासाद्य सुदृढस्तम्भस्थं प्रासादमिव, निबिडप्रकाण्डं कारस्करमिव, समेथिकं खलमिवाऽऽमम्नौ नैजमाधिपत्यम् । कदाचित् काचिदपि चिन्ता नृपचेतश्चेच्चुचुम्ब, तदानीमभयकुमारस्य पुरस्तात् प्रकाशनमेव तत्प्रतीकारः समजनि. भूरिण्युदाहरणानि त्वद्याप्युल्लेखशेखरतामादधतितमाम् ।

पुनस्तत्रत्याः सर्वेऽपि जानपदा धनाढ्यास्तनुसम्पदो वा हर्म्ये दीपकमिव, सरसि घनरसमिव, देहे चैतन्यमिव, हृदये कारुण्यमिव, क्षीरे हविष्यमिव, पठिते विवेकमिव, वैश्वानरे चौष्ण्यमिव, तं नान्देयं[5] चिराय ननन्दुः । तादृशे बुद्धिप्रबले मन्त्रिणि गर्वमवलम्बमाना निजं-

---

१. शेष इव ।

२. मन्त्री ।

३. प्रत्यनीकाः ।

४. इन्द्रतुल्यशक्तिभाजापि ।

५. नन्दाया अपत्यं नान्देयम् ।

निजं भागधेयं भूरि-भूरि प्रशशंसुः। सत्पुरुषसंयोगोऽथवा न केषां जाजायते नाम शान्तिकारणम्? अस्तु, श्रेणिकेन सनाथिते अभय-कुमारेण सुरक्षिते च तस्मिन् साम्राज्ये मर्त्यलोकेऽपि स्वर्लोकसुख-मनुबभूवुः प्रजाः प्रतिपलम्।

इति श्रीचन्दनमुनि-विरचित आर्जुनमालाकारे गद्यकाव्ये
नगर-नृप-महिषी-मन्त्रिवर्णनात्मकः
प्रथमः समुच्छ्वासः

द्वितीयः समुच्छ्वासः

यौवनं धनसम्पत्तिः, प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय, किमु यत्र चतुष्टयम् ?

—(नीतिः)

अस्मिन् परिवर्तिनि संसारे नहि केऽपि पदार्था एकरूपतया स्थितिमश्नुवते । "गच्छतीति जगत्" इत्यन्वर्थेन ध्वनिना स्पष्टमित्यभिव्यज्यते यत्राधुनाऽक्षतसुखमवभासते तत्र कियता कालेनावश्यंभावि दुःखम, यत्र साम्प्रतं मङ्गलनिनादा हरिदन्तान्[1] मुखरीकुर्वते तत्रैव कश्चिदनेहा[2] श्रावयति कर्णकटुकान् कर्कशक्रुष्टशब्दान्[3], यत्रेदानीं अजीनमजर्यराजीवं[4] उद्गिरति परमप्रीतिसौरभं तत्रैव विधिर्निदर्शयति विजृम्भमाणवैरवाडवानलम् । ये च धनाढ्या धनेनाधरीकुर्वन्ति धनदमपीदानीं तेऽपि कतिपयक्षणानन्तरं क्षीणसम्पदो बुभुक्षाक्षाम-कुक्षयो लक्ष्यन्ते परमुखप्रेक्षिणः । ये च केचन गर्वपर्वता ऊर्ध्वीकृतोत्तमाङ्गास्तृणाय जगन्मन्यमानाः श्रुतमश्रुतीकुर्वाणाः सहेलं खेलयन्तो दृष्टाः, तेऽप्यधुना नतमूर्द्धानो विस्मृतस्मया म्लानवदना विधि-

---

१. दिगन्तान् ।

२. कालः ।

३. रोदनशब्दान् ।

४. अजर्य-मैत्री, तदेव राजीवं-कमलम् ।

वैचित्र्यविधुराः पराभूयन्ते पांशुलपादैरपि। अहो! नहि सदृशः समयो वर्वर्त्ति चर्कर्त्ति च कार्यम्।

अस्तु, श्रेणिकसाम्राज्यं सर्वसुखमयं कथमुपप्लवजलपूरेण प्लावयते भीमा भाविनी रेखा? कथमऽल्पीयानपि कृशानुकणो निदर्शयति खाण्डववनदाहताण्डवम्? कथं सूक्ष्ममपि चैनोबीजं फलति परोलक्षाणि हलाहलफलानि? इति श्रोतव्यं सावधानं सर्वैरपि—आसीत्तस्य राजगृहस्यैशाने दिग्विभागे विविधकदम्ब-निम्ब-जम्बीर-रसाल-तालादिशाखिभिः श्यामलच्छायं, सुचारु-पल्लवित-पुष्पित-फलितकारस्करैर्मनोहारि, नितान्तनगनिकायनिषेकतत्पराभिः शीतलसलिलसारिणिभिरापूर्यमाण-क्षुपालवालम्, नाना मयूर-शुक-शारिका-कोकिलादिशकुनिकूजितैर्जेगीयमानगुणम्, प्रस्फुरत्कमलपरिमलैर्हिमकरकरनिकरधवलमधुरसलिलनिभृतै विशिष्टप्रस्तगेत्करनिबद्धतटैर्वर्तुलतटाकैरुपशोभित-चतुष्कपथम्, विनिर्जितमारै सुकुमारै सपत्नीक-धनि-कुमारैरटाट्यमानदूर्वातलम्, कठिनपाठरटनपटुभिः परीक्षोन्मुखैश्छात्रवर्गैर्निरुद्धाऽनेकतरुमूलम्, कतिभिश्चिद् वैद्यनिर्दिष्टकार्यक्रमैरामायाविभिः संसेव्यमानविशुद्धवातम्, पिण्डस्थपदस्थादिध्याननिमग्नमानसैरेकपुद्गलार्पितार्धोन्मिषितदृग्भिस्तपोधनैर्निर्मलीकृतनिकुञ्जम्, प्रत्यक्षनन्दनवनमिव गुणशीलनामकमुद्यानम्।

तस्यैवोद्यानस्यान्तर्गता विभिन्नवर्णविकसितपाटलप्रसून[1]पटलमिषैः प्रकटयन्तीवविश्ववैचित्रीम्, मल्लिकाजाति[2]यूथिका[3]द्यनेकमणीवक[4]व्रातैर्निदर्शयन्तीवानेकात्मकवस्तुस्थितिम्, चम्पकतरोः सुरभीणि हैमपुष्पाण्याबिभ्रती हसन्तीव जम्बूवृक्षस्य सौवर्णसुमसन्दोहम्, समीरेण समं जनमनोहारिस्फुरदामोदं ककुप्सु[5] प्रेषयन्ती दूरेणागच्छतः पथिकानाकारयन्तीव प्रतिपलम्, मधुकराणां मञ्जुगुञ्जारवव्याजैर्जनानां पुरतः ख्यापयन्तीव स्वमकरन्ददानदक्षताम्, ईषत्स्मेरै[6]कोरकनिकुरम्बैः[7] स्पष्टयन्तीव

---

१. पाटलप्रसून—गुलाब के फूल।

२ जाई चमेली।

३ 'जूई' इति ख्याता।

४. मणीवक-पुष्पम्।

५. दिक्षु।

६. किञ्चिद्धसितैः।

७. कलिकासमूहैः

बाल्यकालनिर्मलताम्; कामकेसरिणो गुहेव नीरन्ध्रनिकुञ्जा परमरमणीया नागरिकाणामुत्कृष्टा विहारभूमिः विलसति स्म एका पुष्पवाटिका ।

तस्यां एकस्मिन् दिग्विभागे दोधूयमानोन्नतध्वजादण्डेन स्पर्धयदिवान्तरिक्षम्, अत्यन्तचतुरकारुनिर्मिततया अवहेलयदिव विश्वकर्मणोऽपि निर्माणम्, विचित्रमणिरत्नकुट्टिमतलधारितया प्रत्यक्षयदिव निर्जरगृहाजिरम्, सुलष्टघृष्टभित्तिचाकचिक्यैः स्मारयदिवाऽर्षभे[1]रादर्शभवनम्, पौरैः परमश्रद्धालुतया प्रणिधेयम्, शुशुभे च सहस्रपलप्रमितमुद्गरधरत्वेन "मुद्गरपाणिः" इत्यभिधयाऽऽख्यातस्य यक्षस्यायतनम् ।

तं प्रासादमलंकुर्वाणा, विशिष्टकाष्टघटिता परिहितचारुदुकूला अनर्घ्याभरणभारभूषिता [2]स्फुरत्प्रभावितया महामहोभिः प्रतिष्ठां प्रापिता, अनकैरैहिकसुखार्थिभिरर्थनीया, विविधदविष्टप्रदेशादागतैर्यात्रिकवर्गैर्दर्शनीयमुखारविन्दा, पूर्णमनोरथैः सुकृतिभिः परिवर्धितभाण्डागारा विललास मुद्गरपाणेरप्रतिमशक्तेः प्रतिमा ।

उवास तत्रैवैक उद्यानरक्षकः, अनुऋतु फलवापकोविदः, महीमुर्वरीकर्तुं गोमयकारषादि-क्षोददानदक्षः[3] यथासमयनीरसेकनिपुणः, वृक्षफलपुष्पाणामामग्रतत्त्ववेत्ता, वनस्पतीनां संयोगकार्यपटुः, नानाकारैर्विविधक्षुपकर्तनाभिज्ञः, विहगव्रातविहितोपद्रवनिवारणदत्तावधानः, शशक–मृग-शृगालादीनां मार्गनिरोधोद्यतः, स्वकार्यनिरतो भद्रप्रकृतिरर्जुनाभिधो मालाकारः ।

तस्यात्यन्तवल्लभा कदलीव कोमलाङ्गी, प्रसन्नवदना, चन्द्रलेखेवाऽनलङ्कृतापि स्वभावतः सौन्दर्ययुक्ता, अविज्ञातहावभावविलासविभ्रमापि बाललीलेव मनोहारिणी, असज्जापि मदनतापतप्तानां यूनां छायेवाऽभिप्रेया, बलाहकानुगा विद्युदिव पत्युर्वर्त्मानुवर्त्तिनी, सूचीव सरलप्रकृतिः, तारावलीव प्रकटाचरणा, घटिकेव सामयिककार्याऽनुल्लङ्घिनी बभौ बन्धुमतीनाम्नी भार्या ।

अर्जुनो बन्धुमत्या सार्धं प्रत्यहं पुष्पवाटिकायां पुष्पाण्यवचिनोति स्म । ततोऽनेकपूर्वजपुरुषपरम्परापूजितां मुद्गरपाणियक्षस्य प्रतिमां

---

१. भरतस्य । २. समासेऽप्यय प्रकृतिभाव ।

३. क्षोद—"खाद" इति भाषायाम् ।

सुरभितैः पुष्पैर्भक्तिपुरस्सरं बहुविधमर्चति स्म । अनेकगौरवसूचकैः शब्दैरभिवादयति स्म । पुनः परमहार्दिकश्रद्धया प्रणिदधाति स्म । तदनन्तरं कानिचित्प्रकीर्णानि, कतिचिच्चातुर्येण संदृब्धानि, अपराणि स्तबकितानि, अन्यानि च हारार्धहाररूपाणि प्रसूनानि नगरे गत्वा विक्रीणाति स्म । अनया रीत्या नैजं गार्हस्थ्यजीवनं निर्वाहयति स्म । सुखेन आयानुरूपं व्ययमनुतिष्ठन् सर्वाण्यपि कार्याणि स्वतन्त्रं साधयति स्म ।

अथ तस्मिन्नेव पत्तने ललिताह्वया गोष्ठीलाः, कस्यचिन्महतो राजकार्यस्य सम्पादनेन राज्ञा नि र्भयीकृताः, अभयत्वेनात्यन्तमनर्गलत्वमाप्ताः, आढ्यकुलप्रसूतत्वेन विगतवाणिज्यादिचिन्ताः, नक्तंदिवा स्वायत्तं बम्भ्रम्यमाणाः, कषाया इव मूर्त्ताः, कलहा इव पिण्डीभूताः, अवयवा इव कलिकालवपुषः, दूता इवाऽधर्मराज्ञः, विलासा इव निर्लज्जतायाः, दासा इव दुर्व्यसनानाम्, कल्लोला इव कालुष्योदधेः, परिणामा इव दुष्प्रवृत्तेः, अङ्कुरा इव भाव्युत्पाततरोः, कामं विजह्रिरे षड् युवानो नराः । तैर्यत्र जिगमिषितं तत्रैव गतम्, यच्चिकीर्षितं तदेव कृतम्, यल्लिप्सितं तदेव लब्धम्, यज्जिघत्सितं तदेवात्तम्, यत्पिपासितं तदेव पीतम्, यद्दिदृक्षितं तदेव दृष्टम्, यज्जिहीर्षितं तदेव च हृतम् ।

अहो! यौवनोन्मादः नरमन्धयति बधिरयति चावार्द्धकेऽपि, दविष्ठयति[1] न्याय्यात्पथः, नेदिष्ठयत्यविवेकपद्धतेः[2] द्राघयति दुर्मददानवीयवृत्तिम् ह्रसयत्यात्मनीनगुणग्रामम् । हन्त! हन्त!! तत्रापि चेद्द्धभवविपुलता तदा तु वीचिमालिनमपि चुलुकायते, विपुलामपि वसुधां द्विपदायते, अनन्तमपि वियत्[3]करङ्कायते,[4] अल्पीयोऽपि जीवनं परार्ध्दर्यपरायते[5] च नरः । बत ! बत ! सधनयौवनवैपरीत्यम्—परामर्शपूर्वं प्रवर्त्तिनि पुंसि शीतकत्वारोपः, गौरवार्हे गुरौ उपहासप्रवृत्तिः, धार्मिके सुजने मिथ्याचार-

---

१. अतिदूरं करोतीति दविष्ठयति "णिज् बहुलं करणादिषु" इति सूत्रेण साधु ।

२. नेदिष्ठमन्तिकतमं करोतीति नेदिष्ठयति ।

३. वियत्—आकाशम् ।

४. "नालिकेरजः करङ्कः" इति हैम "टोपसीति" भाषा ।

५. परार्द्धयमिति सर्वोत्कृष्टा संख्या, ततोऽप्यधिकमिवाचरतीति परार्द्धयपरायते ।

ताऽभिव्यक्तिः, सत्सङ्गमेऽपि व्यर्थसमयव्ययः, राद्धान्तप्रत्ययेऽन्धश्रद्धालुतोक्तिः, कौलेयकक्रमे रूढिव्यपदेशः, उचितोपदेशे कर्कशकुतर्कसंपर्कः, सुकृताय प्रेरिते खल्विद[1] मुक्त्वेति कथनम्। तत्रापि चेत्प्रभुत्व लेशावेशस्तदानीं तु-वृश्चिकदष्टवानर इव, पीतमदिरोन्मत्तमतङ्गज इव, अवकरारूढकरभ इव, पीतसिकतोदकवालकीव, तत् किमस्ति भूवलये यन्न कर्तुं स चेष्टेत ? पृथिव्यामपि पदमाधातुं नेहेत नूनमविविक्तात्मा।

अहो ! तुच्छता हि प्रायेण भयङ्करी। बिन्दुमात्रविषविशिष्टो हि वृश्चिकः पुच्छाच्छोटैर्जगद् भीषयते। किमुनान्तर्भीरुर्भषणो भषणेनैव भापयतेऽदण्डिनः पान्थान् ? अपूर्णो हि कुम्भोऽम्भः प्रोच्छालयन् किमुत न क्लेदयति वासांसि निजानेतुः ? शून्यप्राया हि शारदाः स्तनयित्नवः किमुत न बहु स्तनन्ति ?

विध्वंसस्य प्रथमावस्था हि बुद्धिविपर्ययः, अस्तमनाय प्रस्थितो हि प्रदीपोऽथवा बहु चमच्चरीकर्त्ति।

उत, परिपाककालो हि वस्तूनाममन्तिमः क्षणः, पतन्त्येव पत्राणि परिपक्वानि पृथिव्याम्, परिपक्वो हि व्रणश्छिद्यते विज्ञवैद्यैः, भृतो हि कुम्भो निमज्जत्येवाम्भसि। सीमातिवर्त्तनमाहोस्विद् नहि चिरं विषहते प्रकृतिः, तत्प्रतीकारः स्वयमेव जाजायते जवेन। अस्तु, ते षडपि पूरुषा बहून्निरागसो नरान् पीडयामासुः, अनेकान् निर्बलान् लुण्टयामासुः, बह्वीनां कुलबधूटीनां च धर्मं ध्वंसयामासुः। अमीषामुपराग हृदा नागरिका जुगुप्समाना अपि नृपबहुमन्यतां मन्यमानाः सर्वं तितिक्षाञ्चक्रिरे। प्रतीकारैरप्रतिकृता रोगपरम्परेव तेषामुद्दण्डता निर्भृरमेधाञ्चक्रे। अहो ! युक्तियुक्तोक्तिर्नीतिज्ञानाम्—"अपराधानां मर्षणमप्यपराधः, अन्यायकर्तृणामुपेक्षा ह्यन्यायपीडितेष्वत्याचारः" खलु व्यक्तितन्त्रे राज्ये ईदृक्षा मन्तवो[2] भवन्त्येव प्रायशः। प्रजातन्त्रे तु नेदृशानामागसां प्रायिकोऽवकाशः। यद्यपि श्रेणिकेन महीक्षिता[3] "यत्किञ्चिदनुचितेऽपि समाचरितेऽदण्डनीया एते" इति नहि स्वात-

---

१. 'अलंखल्वोः प्रतिषेधे क्त्वा वा' इति सूत्रेण क्त्वा प्रत्ययः। अलं इति कथनेनेतिभावः।

२. अपराधाः।

३. पार्थिवेन।

न्त्यमदायि, तथापि तैः स्वाऽऽहोपुरुषिकया गर्हितमनुष्ठितम्, भृशमनधिकृत चेष्टितं च।

अथाऽन्यदा कुशशेयकोशैः सह निद्रामुद्रितलोचनान् जनान प्रबोधयन्निव, जगद्व्याप्तं तमो ज्योत्स्नाभिः सह तिरोभावयन्निव, मलिम्लुचानां साहसं चक्रवाकाणां शोकेन सार्धमधरयन्निव, गृहमणीनामवलिं निशारत्नेन साकमकिञ्चित्करपदवीं प्रापयन्निव, सदपि तारकचक्रवाल दिवान्धवृन्दैः सत्राऽदृश्ययन्निव, यामिकान् कुमुदवनेनामा स्वापयन्निव, निर्भयं जीवलोकं विदधत्प्राच्यामुदियाय दिवाकरः।

अहो चामीकरवर्णान् चरिष्णून् मरीचिमालिनः सञ्चरतः किरणान् विलोक्य चोकूयमाना विहङ्गमाः प्रडीनोड्डीनसण्डीनानि सोत्सवं कर्तुं लग्नाः। निजनिजाध्वानि प्रतस्थिरे पथिकाः। ध्यायन्ति केचिद् निजनिजेष्टदेवम्, कुर्वन्ति जैनर्षयः प्रतिलेखनादिकृत्यमावश्यक समाप्य। स्वीकुर्वन्ति श्रावकाः शुद्धं सामायिकं सुसमाहिताः। परावर्तयन्ति नमस्कारमहामन्त्रमालां कतिचन मौनावलम्बिनो जनाः। क्रीडन्ति मातुः परितो दुग्धं याचमाना मुग्धाः शिशवः। रुदन्ति कतिचन स्तनन्धया जनन्याश्चीवरप्रान्तमादाय नामग्राह किमपि वस्तु मार्गयन्तः। व्रजन्ति बाला विद्यालये पुस्तकानि कक्षीकृत्य सत्वरपादपातम्[1]। अन्तर्दधते केचिल्लीलालीनमानसाः पाठशालागमनात्। जागरयति जननी कञ्चन दुग्धमुखं मन्दं बालकं "उत्तिष्ठ-उत्तिष्ठ, जागृहि-जागृहि, पश्य-पश्य भानुमांस्तव शिरसि समागतः" इत्यादिसुधासोदरया वचनपरम्परया। परिमृजन्त्यापणिकाश्च स्वीयान् स्वीयानापणान्।

अहह! एकोऽयमा कियन्ति कार्याणि साधयति? कियतो जनान् मार्गं निर्देशयति? कियन्ति क्षेत्रोद्यानानि च तापेन परिवर्धयति? कियतः पङ्किलान् पथः शुष्कीकुरुते? चित्रणीया रवेः परोपकारपरायणता, अतएव "जगच्चक्षुः, जगद्बान्धवः" इत्यादिभिर्गौरवान्वितैरभिधेयैरभिधीयतेऽयम्।

अर्जुनोऽप्यर्जुनवर्णमुदीयमानमरुणं निध्याय[2] इति दध्यौ—"आः स्मृतम्, अद्यास्ति कश्चिदुत्सवमयो दिवसो नागराणाम्। हन्ताय

---

१ क्रियाविशेषणमिदम्।

२ दृष्ट्वा।

तरणिः कांस्कान् महोत्सवमयान् सद्यस्कान्[1] दिवसान् जगतां पुरस्ता-दुपढौकयते। कीदृशाः कीदृशाः सुन्दरा अवसरा जनानामग्रतो निस्स-रन्ति सवितुः साहाय्येन। परन्तु स्तोका एव जनाः समयं सफलयितु-मलंभविष्णवः। नूनं समयमूल्यं विदन्ति विद्वांस एव, मूर्खास्तु समयं पूरयितुं प्रारभन्ते काञ्चन निष्प्रयोजनां क्रीडाम्। खलु मया-प्यद्य त्वरणीयं, गमनीयं क्षिप्रमेव पुष्पाण्यवचेतुं पुष्पवाटिकायाम् भविष्यत्यन्यथा पृष्ठतोऽनेहा[2], पश्चात्तद्ग्रहणाय नहि किमपि कौशलं वरीवृत्यते।" इति संचिन्त्य सत्वरमेव शौचस्नानादिक्रियां निर्वर्त्य सधर्मिण्या बन्धुमत्या सह उद्यानाभिमुखं प्रतस्थे।

अद्य मम सुमनसां बहु विक्रयो भावीति कल्पयन् तत्कालमेवाऽऽज-गाम पुष्पारामे। किसलयकोमलाभ्यां कराभ्यां स्वशिरःस्निग्धश्याम-लकुन्तलान् स्पर्धयतो मकरन्दमास्वादयतो मिलिन्दान् दूरयन्ती बन्धू-मती चातुर्येण कमलनालान्याकुञ्च्य[3] वंशकरण्डके पुष्पाण्यवचेतुं लग्ना। "स्वजन्मभूमि त्यागेऽपि इभ्यानामुत्तमाङ्गेषु लीलावतीनां लसत्कण्ठपीठेषु च वत्स्यामो वयमित्यर्धोन्मिषितव्याजेन हसन्त्य इव कलिकास्ताःशिरीष-सुकुमारकरस्पर्शेनावचितास्तया पुष्पावचायिन्या। मालिकोऽपि तदवचितानि प्रसूनानि तदैकवर्णतया व्यनक्ति स्म। प्रलम्बितगुणया सीविन्या विभिन्नवर्णानि पुष्पाण्यादाय माल्यरूपेण दाक्षिण्यतो गुम्फति स्म मङ्क्षु। पुनः केषाञ्चित् केवलवर्णमनोहराणामसुगन्धितानां सुमनसां स्रजः पृथगेव जग्रन्थ, केषाञ्चन गेन्दुकाकारेण गुच्छकं विरचयाञ्च-कार, पुनःकस्मिंश्चिद् विशालामत्रे वस्त्रं विस्तार्य सूक्ष्मसूत्रेण पुष्पाणां वृत्तानि संसूत्र्य दक्षिणावर्त्तादिविचित्रचित्रकरचित्रेण झगिति विन्या-सयामास, कानिचित्तु प्रकीर्णान्येव मणीवकानि[4] दक्षतया ररक्ष सः। इत्थं कार्यं समाप्य यक्षमर्चितुं यावच्चैत्याभिमुखः सपत्नीकःप्रत्यावर्त्तितुं लग्नोऽर्जुनस्तावत्ते षडपि पुरुषाः सूर्यवृषभा इव स्वच्छन्दमटाट्यां कुर्वाणाः पिशाचा इवाट्टहासं हसन्त, पिशाचकिन इव गर्हितं चेष्टमानाः, वात-किन इवानर्गलं प्रलपन्त क्षणाद् धावमानाः, क्षणात्परस्परं गले भुजा-

---

१. नवीनान्।

२. ऋदुसनसिति सूत्रेण सेर्डा, ततोऽनेहा-समयः।

३. मोटयित्वा। ४. पुष्पाणि

युग्ममादधानाः, आवर्त्तनाकृष्टाः पोता इव कालेनाकृष्टास्तत्रोद्याने यक्षमन्दिरपरिसरं समाजग्मुः ।

॥इति श्रीचन्दनमुनि-विरचित आर्जुनमालाकारे गद्यकाव्ये
उद्यानार्जुन-तत्पत्नी-षट्पुरुष-सूर्योदयादि-
वर्णनात्मको द्वितीयः समुच्छ्‌वासः॥

तृतीयः समुच्छ्वासः

"जनः किं नाऽनर्थं जनयति मदान्धो द्विप इव ।"

—(सूक्तिमुक्तावलिः)

इतः प्रस्फुटत्सौरभसुमनोभिराशाप्रदेशान् सुरभयन्तम्, आमोदमुदितैः शिलीमुखैर्मञ्जुगुञ्जारवव्याजेनोभयतः स्तूयमानम्, मस्तकधृतकुसुमभृतभाजनया भार्ययाऽनुगम्यमानम् विचारमग्नया दृशा इतस्ततोऽनालोकमानम्, पिण्डीभूतं सारल्यमिवाऽऽगच्छन्तमर्जुनं निभाल्य षडपि ते मिथ इत्थं प्रलपितुमारेभिरे—

प्रथमः—कोऽयं कोऽयमागच्छति जडात्मा सम्मुखीनेन पथा ?

द्वितीयः—न वेत्सि किमु ? 'धर्मपुत्रानुजोऽर्जुनोऽयमनङ्गधनुर्धर'[1] ।

तृतीयः—अहा ! केयमस्यानुगामिनी विभ्रममन्दया गत्या पदं विन्यस्यन्ती कामिनी ?

चतुर्थः—अरे ! न जानासि किमु ? अस्य कृष्णावतारस्य कमनीया कान्ता ।

पञ्चमः—हन्त ! मन्दमेधमा वेधसा कथमर्पिता किल काकाय कलहंसी ?

षष्ठः—न पीता चेदस्याः सुधामधरयन्त्यधरमाधुरी तर्हि मुधैव गमितं तारुण्यम् ।

---

१. व्यङ्ग्योक्तिरियं नामसाधर्म्यात् ।

२ "अनङ्गधनुर्धर" इति पुष्पं कामस्य धनुस्तद्धारकः ।

अन्तराल एव परः—अलं विलम्बेन, तर्हि करणीयं त्वरयैव मनीषितं कर्म ।

अपरः कश्चित्—अस्त्यनया सार्धमस्याः पतिः ; कथं क्रियते बलात्कारः ?

विहस्येतर.—भृशं भीरुकोऽसि त्व तु, शतशो भ्रमन्ति वराका एतादृशाः ।

मुखं विकृत्यापरः—बुद्ध्या कार्यमानयेम् यथा सर्पोऽपि म्रियते न त्रुट्यति यष्टिरपि ।

शनैःशनैरपरः—ब्रूहि, तर्हि कथंकारं सफला भवामः ?

सोत्प्रासमन्य:—अलं बहुशिरोधूर्णनेन प्रतिपादयामि युक्तिमेकाम् ।

सहाट्टहासं सर्वेऽपि—निवेदय निवेदय, त्वमेव बुद्ध्याऽभयकुमारोऽसि ।

शृण्वन्तु तर्हि—पूर्वमेव वयं यक्षालयमध्यास्महे,कपाटयो पृष्टतोऽन्तर्दध्महे, श्वासकासादिवेगमप्यनाविर्भावयन्तस्तं च प्रतीक्षामहे,यदाऽसावर्जुनः प्रतिमायाः पुरस्तात् सहर्ष भूमिचुम्बि-प्रणामं विदध्यात्, शकुन्ते श्येना इव तत्कालमतर्कितास्तस्योपरि निपताम. पुन. सुदृढं तस्य करौ चरणौ च गृहीत्वा पृष्टतो बध्नामः, तं च तदवस्थं तत्रैव मुक्त्वा वाञ्छितं साधयामो नि.सङ्कोचतया, किं करणीयमेकाकिनाऽनेन ?

करतल स्फोटयन्त सर्वेऽपि—धन्योऽसि शतकृत्वो मित्र ? कीदृशी सरला सरणिस्त्वया निर्दशिता कुशाग्रधिया तु शेषमपि ह्रेपयसि[1] । अहह ! पारितोषिकयोग्योऽसि, सहस्ताक्षेपमन्योन्यमट्टहासं कर्तु लग्नाः ।

अन्यतम.—आगतोऽयं बलीवर्दः समीपमेव, न खलु श्रेयान् लम्बो विलम्बः इतरथाऽयं सौवर्णिकोऽवसर. करादपसरिष्यति । इत्याकर्ण्य सर्वेऽपि व्रजन्तु-व्रजन्तु वेगेनेति जञ्जप्यमानाः[2] कस्मिंश्चित् स्थले निधिशङ्कया कृपणा इव एकैकस्मादग्रतो धावन्तोऽभीका[3] यक्षभवनमाभेजुः, अररियुग्म[4]मग्रतःकृत्वा स्वसत्तामदर्शयन्तो मूषिकं निगृहीतुमनसो मार्जारा इव नीरवतया च तस्थिवांसः ।

---

१. लज्जयसे ।   २. गर्हित निगदन्त. ।
३. कामुका. ।   ४. कपाटयुगलम् ।

धिक्! कामुकानां साहसिकीं प्रवृत्तिम्। गर्हणीया तेषां निर्ह्रीकता निस्त्रिंशमपि न्यक्करोति तेषां नृशंसता। कज्जलमप्युज्ज्वलयति तेषां कालुष्यमयी मानसी प्रवृत्तिः। दाववह्नेरपि शैत्यमुद्भावयति जाज्वल्यमाना कमनज्वरज्वाला। तालपुटमपि विघटयति स्मर्यमाणैव वर्धिष्णु-विषमा विषमायुधविषलहरी। तामस क्षुरप्र-वल्लयादिबाणानप्यवगणयति कंदर्पस्य कोमला अपि पञ्च बाणाः। स्खलन्ति ह्यत्रागच्छन्तो दिग्विजयिनो विदुषां वरेण्या अपि। पतन्त्यत्रागच्छन्तः पुरन्दरपूजनीया अपि परमर्षयः। सीदन्ति सीमन्तिनीनां पुरतः जगज्जिष्णवोऽपि जना। हा! किमिदममृतायमानं विषं स्रष्ट विधिना? यस्मिन् बद्धा अपि सुखमामनन्ति कोऽयं विचित्रः पाशः? यस्मिन् मग्ना अपि चाभग्नाशया कोऽयं नव्यो निषद्वरः[1]? आर्द्रकुमारोऽपि ह्यत्रागच्छन् निद्रितो बभूव। पपात नन्दीषेणोऽप्यस्मिन्नुदपाने[2]। आगत आषाढोऽप्यस्या राक्षस्या दाढायाम्। अन्यमतावलम्बिनां देवा हरिहरादयोऽपि क्षीणा हरिणाक्षीणां पुरतः। बिडौजा अपि विडम्बितोऽनेन सुमेषुणा। अहो! कियद् वर्णयामि? के केऽनर्था न जज्ञिरे कामिनीनां कृते? कांस्कान् महाहवानाऽजूहव[3]न्नितम्बिनीनां लिप्सा? के के विक्रान्ता युयुत्सवो नहि पञ्चत्वमाप्ता लीलवतीनां लाम्पट्यमुद्वहवन्तः? के के यशस्विनो नहि तिरस्कारपात्राण्यभूवन् वशापारवश्यमासादयन्त? किं बहुना? त्रिलोकीमपीयं कोकिलकण्ठी सशोकीचकार। उत, यया संवर्त्तवात्यया पर्वता अपि चकम्पिरे तत्राऽतरुणपत्राणां पतने का नाम शङ्का? यस्मिन् दावानले महारण्यमपि भस्मसाज्जातं तत्र तूलव्रातानां[4] का नाम यतना? येन मधुसारथिना[5] महान्तोऽपि कदर्थितास्तत्राऽमीषां षण्णाकामकीटानां का नाम गणना?

धन्यास्त एव द्वित्रा महामनसो जम्बूस्थूलभद्राद्या यैस्त्रिभुवनं विजिगीषतो[6] महौजसो मकरध्वजसम्राजो ध्वजिनी जवेन विनिर्जिता ब्रह्मचर्यासिना पशुमार मारिता च।

इतो मुद्गरपाणेः प्रासादमागत्य यावदर्जुनः पुष्पाण्युपढौकमानः प्रणनाम प्रतिमां निराकुलतया, तावदमी षडपि दुर्ललिता ललिता[7] निगृ-

---

१. कर्द्दमः। २. कूपे।
३. आह्वान दत्तवान् ४. तूलम्, रूई, इति भाषा।
५. मन्मथेन। ६. जेतुमिच्छतः।
७. इत्येषा संज्ञा

ह्यतां-निगृह्यतामयं दुरात्मेति तारस्वरेण कथयन्तः विद्युत्प्रपातं पतिताः। झगित्येव केनचित्तस्य दृढं दक्षिणः करो जगृहे, केनचित्पापीयसा वामपाणिर्मोटयताऽऽददे, अन्योऽपस-यं पादमाचकर्ष, अपरश्च सव्यम्, द्वाभ्यामपराभ्यां च निगडसहोदरया रज्ज्वा पृष्ठतो मत्स्यबन्धं बद्धोऽसौ मालिकः। अर्जुनेन तु वित्तमपि[1] नहि किं वृत्तमिदम्: स्तब्ध इव संजातः क्षणमेकम्। वक्तुमपि न पारितं तेन किमपि। इत्थं तं सन्दानितं[2] तत्रैव मुक्त्वा सहसैव कामान्धा अन्तर्मन्दिरं प्रविशन्तीं बन्धुमतीं निस्त्रपतया जल्पयितुमारभन्त—"अहह! आयाहि-आयाहि लावण्यलीलालहरि! प्राणप्रिये! पूरय-पूरय मनोरथानस्माकम्। भागिरथि! पवित्रय कन्दर्पपङ्कपङ्किलानस्मादृशान् पापान्। यौवनघनपटलि! सिञ्चय द्रुतमस्मान् मारनिदाघमारितान् पान्थान्। सुभ्रू[3]! किं वृथैव भ्रामयसि कामकातरानमून्। मोहनवल्लि! कथं न परिष्वजसि हरितभरितान् वृक्षान्? वसुधावतरिते सुधे! कथं न जीवयसि इमान् चैतन्यशून्यान् जन्तून्?

इत्थमनर्गलानि विषयविषाक्तानि वाक्यानि मुखादुदीरयन्तो मृत्युना सह तां परिरब्धुं बद्धोद्यमा बभूवुः।

श्येनैराक्रान्ता चिल्लीव, हर्यक्षैर्निरीक्षिता च हरिणीवाभूद् वेपमाना बन्धुमती किंकर्तव्यविमूढा। शुष्कतालुजिह्वोष्ठाया इतस्ततः किमपि शरणमविलोकमानाया अक्षिपुरः परिस्फुरद्-विविधवर्णान्धितमसाया [4]वैवर्ण्यमाविरभूत्तस्या वदनारविन्दे। "अयिप्राणेश! त्रायस्व-त्रायस्व मामबलाम्। धावस्व-धावस्व वेगेन पतिदेव! अमीभिर्धर्मध्वंसिभिरहमाक्रम्ये" भग्नस्वरेणेत्थमाम्रेडयन्तीं तां ते षडपि दुराचारा धरणौ निपात्य बलात्कर्त्तुं लग्नाः।

यक्षप्रतिमाग्रतः पतितेन पृष्ठतो नद्धेन मालाकारेण प्रस्तरमपि द्रवीकुर्वद्दैन्यपरिपूर्णं [5]परिदेवनमश्रावि प्राणेशायाः, व्यलोकि च कृत्स्नापि दुरात्मभिः क्रियमाणा कान्तायाः कदर्थना। तत्कालमेव तस्य कम्पमानाधरस्य चटिता ललाटपट्टे त्रिवली, संजातोषाकालिकप्राचीरागमनुहरन्ती कोपकोषायिता चाम्बकयुगली[6]। घातयामि, पातयामि, मारयामि हन्मि, व्यापादयामि, अमून् दुष्टान्, पापान्, दुराचारान्, नीचान् क्षणेनैव। इत्थं मानसमावेगमाभेजानो जाज्वल्यमानक्रुत्-

---

१. ज्ञातमपि २. निगडितम् ३. स्त्रूःश्रीवत् ततःसबुद्धो दीर्घः
४. कालिमा ५. रोदनम् ६. नेत्रयुगलम्

कृशानुना प्रवृद्धपराक्रमः पुष्पलावो[1] बन्धनानि त्रोटयितुं भृशं प्रायतिष्ट, समस्तशरीरशौर्येण च कर-चरणादीनूर्ध्वाऽधः सञ्चालयितुमत्यर्थम-चेष्टिष्ट, किन्तु निकाचितानि कर्मबन्धनान्यभुक्त्वैव जन्तुरिव तानि नहि द्विधाकर्त्तुं शशाक। हन्त ! स्वकान्तातिरस्कारो नहि सोढुं शक्यते तिरश्चापि, किं नाम पाणिपादवता विवेकिना नरेण ?

पञ्जरावरुद्ध-पञ्चाननस्येव आलाननियन्त्रितस्तम्बेरमस्येव नद्धार्जुनस्य सर्वेऽपि शारीरिकाः प्रयत्ना मोघमार्गमङ्गीचक्रुः[2]। धग्धगितिकुर्वद्वपुस्तातप्यमान-स्तत्रैव पतित इत्थं विकल्पयितुं लग्नः—
"हा ! हन्त ! ! किं जातमद्य ? कोऽयं दरिद्रो द्वादशात्मा[3] दत्तदर्शनः ? कोऽयं दुर्दशादर्शको दिवसः ? केयं प्रलयपरिप्लुता वेला ? केयं विघटनां घटयन्ती घटिका ? कोऽप्यऽपरोऽत्र नाऽपि[4] नास्ति यस्याग्रतः पूत्कुर्वे। बत ! बत ! मया वृथैव पर्युपासिता मुद्गरपाणेः प्रतिमा। हन्त ! हन्त ! मया फल्गु हि कृत पुष्पोपढौकनम्। अरेरे ! वन्ध्यैव कृता चन्दनादिद्रव्यैरर्चना। अहह ! मुधैव विहितं मस्तकघर्षण-मग्रतोऽस्याः। अद्य मम सर्वमपि भस्मनिहुतम्, प्रवाहेमूत्रितम् अरण्येरुदितं चाऽभूत्। शक्तिशून्ये प्रतिमे ! किं विलोकसे नेत्रे-विस्फार्य भक्तकदर्थनाम् ? जडात्मिके ! न त्रपसे किमुत स्वमस्तित्वमाविर्भावयन्ती ? शून्यचैतन्ये ! भक्तस्य दुर्दशां कोऽपि शक्तिमान् नेक्षितुमलम्, त्वं न कथं म्रियसे द्विचुलुकमिते जले निमज्जन्ती पुरतो भवन्तीं दुर्घटनामविघटयन्ती ? वृथैव त्वां स्तुवन्ति विस्तरितैः स्तवन-विन्यासैर्जनाः। अहो ! अन्धानां पृष्टतोऽन्धा जङ्गम्यन्ते। धिङ् मम पूर्वजपुरुषाणामविवेकातिरेकताम, ये ईदृशीं गर्हणीयामर्हणामयीं कुलपरम्परां सञ्चालयामासुः। दारुमयि ! कथं मन्दिरमध्यमध्यासीना मूढान् धर्माच्च्यावयसे ? किमुत ज्वलज्जलनज्वालायां पतित्वा पाकाय भस्मसान्न भवसि ? पतितसत्वे ! शक्तिविरक्तया तवानया स्थायिकयाऽलमलम्। निष्क्रिये ! किमन्तर्गण्डु[5] गौरवमावहसि चेदवसरेऽपि न कार्यं सिषाधयिषसि ? किं तेन जवनेनाश्वेन यो न दशशीर्षावसानमहोत्सवेऽपि धावति ? भवतु तया पीनोध्न्या धेन्वा या न जातुचिदपि क्षरति क्षीरम्। कृतं तेन धन्वन्तरिणा भिषग्वरेण यो गदप्रतीकारसमयेऽपि प्रमाद्यति। मुद्गरधारिणि ! अस्तु तवान्तः

---

१. मालिकः २ वैफल्यमापुः ३. सूर्य.
४. नरोऽपि ५. निरर्थकम्।

शून्यया मुद्गरविभीषिकया । ज्ञातं तवाद्य देवसायुज्यम्[1] । गतं तवाद्य प्रभाववैभवम् । च्युतं तवाद्य चमत्कारचातुर्यम् । विदितं तवाद्य वास्तविकं रूपम् । पतितस्तवाद्य प्रत्ययः समेषां हृदयस्थलात् । अत ऊर्ध्वं न केऽपि त्वां पूज्यदृशा प्रेक्षिष्यन्ते, नोपढौकिष्यन्ते च किमपि वरमुपहरणीयं वस्तु तवाग्रतः । प्रत्युत, शून्यं तव धामोपस्थास्यन्ते शीतलायानानि[2] यामिन्याम् । भैरववाहनानां[3] प्रस्रवणेन संवर्त्स्यति तव सुतरां स्नानम् । स्तोष्यन्ते त्वां कपोतसंघाता दिवानिशम् । भविष्यति तव चार्चिक्यं[4] शकुन्तपोतानां विष्टाभिः । शब्दायिष्यते ते घण्टिका घूकानां निःशूकैर्नादैः । सम्पत्स्यते चाऽत्र प्रकाशो निशायां सञ्चरतां फणिनां मणिभि ।" इत्थं विकल्पानां चक्रं भ्रामयतः सहायतापराङ्मुखत्वेन यक्षं प्रति भृशमुपालभमानस्य कोपावेश-परवशत्वेनाऽसकृच्छपमानस्य तस्य वपुषि कम्पमानासनो विदित-समस्तदुःखदवृत्तान्तो भक्तसेवाहेवाकाकृष्टान्तःकरणश्चञ्चच्चमत्कार-दर्शनदक्षो यक्षो झिगिति प्राविक्षत् शक्तिरूपेण । तत्कालमेव तस्य विग्रहे निग्रहक्षमा हस्तिनां स्थामापि[5] परास्तयन्ती, शिलोच्चयमपि चूर्णयितुं प्रभूष्णुः शक्तिः प्रादुर्बभूव । अचिन्त्यो हि सुपर्वणां प्रभावः । कमलनालानीव अपरिपक्वसूत्राणीव स तानि बन्धनानि क्षिप्रमना-यासं त्रोटयामास । तदैव सहस्रपलभारभारिणं मुद्गरं दक्षिणाशेशि-तेव दण्डं समुत्पाट्य क्रोधाध्मातलोचनो वदनादित्थमाम्रेडयन् दधावे-—"भो ! भोः ! पापीयसां पुरोगा ! दुराचारिणो दुष्टाः ! स्थीयताम् स्थीयताम् संनिधत्तेऽधुनैव कामुकहतकान कृतान्तः । निर्लज्जाः ! बल-त्कारमाचरतां शुनोऽप्यतिरिच्यते युष्माक दुश्चरित्रम् । कामान्धाः ! सर्वत्रैवान्ध्यमुद्भावितम् । जात-जाता खलु प्रतिक्रिया युष्माक दुःसाध्योपतापस्य । गत-गतं युष्माकं सापराधं जीवनम् । पतित-पतिता बत पतनोन्मुखाः प्राणाः प्रयाणप्रियाणाम् ।"

तैर्विषयविह्वलैर्यावद् विलोकितमेव नहि तावदपतद् दुर्धृष्याकृति-रर्जुनो मुद्गरमुद्यम्य[6] षण्णामुपरि । पूर्वमेवोच्चण्डक्रोधचण्डिम्ना द्विगुणितौजाः पुनर्यक्षावेशविशेषित इयद् दृढ मुद्गरेण प्राहार्षीत्, मृन्म-यभाण्डानीव तेषां षण्णामपि च मस्तकानि सशब्दमभाङ्क्षीत् । गाढं वैषयिकरक्तिमानं व्यञ्जयन्तीव तदीयमुखेभ्यो निःसृता कदुष्ण-

---

१. देवत्वम् । २ गर्दभा । ३. श्वानानाम् ।
४. चन्दनादिना पुण्ड्रादिक्षेपणम् । ५. बलमपि ६. उत्थाप्य ।

रक्तधारा। बहु दुर्विलोकितमावाभ्यामितीव पश्चात्तापपरायणौ बहिरापतितौ नयनगोलकौ तेषाम्। किमावाभ्यामुर्ध्वीभूय करणीयमितीव ह्रीते[1] निम्नतां गते तेषां नक्रे[2]। परं चिचर्वयिषूणां नियतमेव पतनमितीव स्वनिदर्शनेन प्रकटयन्तो दन्ता भुवस्तले पेतुः। आगच्छन्तु भोक्तुकामा. सर्वेऽपि शृगाल-कुक्कर-गृध्राद्या मनोहृत्य च भवन्तु कुक्षिम्भरय इतीव निवेदयन्ति[3] तेषां कलेवराणि लम्बायमानानि निश्चेष्टं काष्टानीव पतितानि तत्र। एवं नामशेषान्[4] तानशेषान् विधायापि नहि शशाम रोषकृशानोः सर्वतोमुखी ज्वाला मालाकारस्य। विकृतवेषां बन्धुमतीं निरीक्ष्याऽथ कोपकर्कशया गिरा निर्भर्त्सयन्निदमब्रवीत्—"दुष्टे! कथमद्यापि जीवसि? ध्वंसपातिव्रत्यापि मुखं दर्शयन्ती न कथं त्रपसे? यद्यपि विभाति जीवनं वल्लभं धर्मस्तु ततोऽपि वल्लभतम। ध्रुवधर्माय क्षणिक जीवनं तृणायन्ते तत्वज्ञाः। पापीयसि! त्वं जीवनव्यामोहेन धर्ममत्याक्षीः। पतितसत्त्वे! यदा ते षडपि नीचास्त्वां प्रसह्य स्प्रष्टुं प्रायतिषत तदा न कथमकृथास्त्वं रचनात्मकं कार्यम्? जिह्वामाकृष्य न कथममृथास्तत्कालमेव? किन्तु तात्पर्यपरिवर्जितैः "प्राणेश्वर! त्रायस्व-त्रायस्वेति" प्रलापैः किं सतीमतल्लिकात्वमदीदृशस्तदानीम्। नाकर्णि किमु त्वया बहुशः कर्णाभ्याम्? --यद् वसुमत्या माता धैर्यधूर्धारिणी धारिणी रथिकेन बलात्कृता क्षणादेव रसनामाकृष्य प्राणानुत्ससर्ज। साध्वीनां धर्मं ध्वंसयितु कोऽपि क्षमो नास्ति क्षमायाम्। प्रौढपराक्रमोऽपि पौलस्त्यो नहि प्रबभूव सीतां स्प्रष्टुमपि। त्वादृक्षाः पुंश्चल्यस्तु चलिता एव विलोक्यन्ते कामयितृभि पुंभिः। धृष्टे! श्वसनविश्वासेन[6] जीवन्त्युपविष्टापि शीलविलयेन व्यापन्ना किं ममान्तःकरणं दुःखाकरोषि? निनीषामि त्वामपि तैर्जिगमिषितां[7] पद्धतिम्" इत्थमाक्रोशयन् समुत्सारितहिताहितविवेकःपार्शविकबलमनुशीलयन् हिमानीकम्पं कम्पमानां कान्दिशीकां मृत्युदण्डायोग्यां कर्तव्यकातरां कामिनीं तेनैव मुद्गरेण शिरसि गाढमताडयत्। मामेति जल्पन्ती वराकी दीर्घनिद्रया मुद्रितलोचना वृक्षाद् वृक्णा[8] शाखेव भूभागमशिश्रियत्।

हा! हा!! कीदृशी कोपान्धलानां तामसी वृत्तिः? प्रतिघप्रवाहेण

---

१. लज्जिते। २. नासिके। ३. शतृप्रत्ययस्य रूपम्।
४. मृतान्। ५. [illegible]। ६. श्वासप्रत्ययेन।
७. गन्तुमिष्टाम्। ८. छिन्ना।

परिप्लाव्यमानानां भूस्पृशां कीदृग् दयनीया दशा ? हन्त ! कीदृग् दुष्कृत्यमाचरितमनालोच्यैव दुष्टेन ?

प्राणेशां बन्धूमतीं विशस्याऽर्थाऽर्जुनः परामृशति स्म रक्तपातसंजातार्ती वाततायिन्या भावनया—नूनमत्रत्या नागरिकाः प्रायेण दुर्वृत्ता वर्त्तन्ते। सच्चरित्रबलममीषु मनागपि नहि विजृम्भते । अत्र महीपालोऽपि नहि नीतिपरायणतया प्रजामनुशास्ति । नगरे किं घटनाचक्रं बम्भ्रमीतीति नावधत्ते । अस्य शासने विषादः साधूनाम्, सङ्कोचः सच्चरित्राणाम्, प्रोत्साहः कापथप्रस्थितानाम्, पुरस्कारो लालाटिकानाम् पर्युपास्तिः पाषण्डानाम्, अर्चा दम्भदर्व्वीकरदृष्टानाम्, वैधुर्यं धैर्यधुरन्धराणाम्, कदर्थना सत्यवाग्मिनाम्, उपहासश्चार्यवर्याणाम् । अस्तु, अद्यप्रभृति निरन्तरमहं षट्पुरुषान् नारीमेकां चानेन मुद्गरेण हनिष्यामीति प्रतिजानामि; यथा पौरपरिवृतो महीपोऽपि प्राप्स्यति स्वकीय-दुःशासित-स्वाधीनसाम्राज्यसुखम्, ज्ञास्यति च सुतरां स्वौद्धत्यपरिणामम् ।

अत ऊर्ध्वं प्रत्यहं यक्षाधिष्ठिततनुरर्जुनो मुद्गरमुद्यम्य कोपकम्प्राधरः पर्यटन् निरपराधान् स्त्रीसप्तमान् षड् मानवान् पितृपतिमुखं[2] प्रवेशयति स्म । यावन्न तस्य प्रतिज्ञातं पूर्तिमियर्त्ति स्म तावन्नहि स विश्रान्तिमाश्रयते स्म । अहो ! षण्णामधमानामपराधेन कियन्तस्तत्रत्या निरपराधा आलेख्यशेषतामाश्रयितुं लग्नाः । उत,एकस्मिन्नपि गृहे निक्षिप्तोऽग्निकणः पारिपार्श्विकानां[3] किमु न शतशो भुवनानि भस्मसात्कुर्यात् ? एकस्यैव दुर्योधनस्य दुर्णयेन न किमु कृतान्तेन कवलीकृतं कौरवकुलम् ? एकस्यैव दशकन्धरस्य दुराग्रहेण लङ्कावास्तव्यैः किं किं कृच्छ्रं नान्वभावि ? कतिपयानामेव यादवकुमाराणां मदिरोन्मादितया नाऽजनि किमुत दाहो देवलोकभूताया द्वारकायाः ? अत एव "देशत्यागाच्चदुर्जनः" इत्युक्तिर्याथातथ्यमेव व्यनक्ति ।

अजनि कोलाहलो जनतायाम् । कोऽयमाकस्मिक उत्पातः समुत्पन्नो दुर्भाग्येण ? केयमतर्किता महामारी जनसंहाराय समुद्यता ? केयं जन्मजन्मान्तरोप्ता अनेकदुर्व्यसनपयःसिक्ता पौराणां पापवल्ली पल्लविता ? अहरहः केषाञ्चिद् भ्राता, केषाञ्चिदेकाक्ष्येव नन्दनः, केषा-

---

१ मारयित्वा ।

२. कालमुखम् ।

३. प्रातिवेश्मिकानाम्

ञ्चिज्जामाता, केषाञ्चित्पौत्रः, केषाञ्चिन्माता, केषाञ्चिद् भगिनी, केषाञ्चिदभागिनेयी, व्यापाद्यते चाऽर्जुनेन। सम्पूर्णमपि पत्तनं हाहारवेण व्यानशे। प्रतिसदनमश्रूयत दैन्यमुदीरयन्नाक्रन्दनध्वनिः। प्रतिमार्गमश्रियत चैषैव दुःखदवार्त्ता पौरैरितरेतरम्। प्राप पूत्कृतिर्नृपान्तिकमपि। दत्तावधानेन श्रेणिकेनापि बहुप्रायाति[1] तदुपद्रवद्रुमोन्मूलनाय समूलं, किन्तु लक्ष्यमभिन्दाना धनुष्मत इषव इव नृपस्य सर्वेऽपि प्रयत्ना वैफल्यमापुः। अमात्यप्रवरेण अभयकुमारेण तदाऽनुसमधायि[2]; किमिदं वृत्तमिति! अन्ततोगत्वा निष्कर्षपरामर्शनेन चेत्यज्ञायि—"यक्षाधिष्ठितवपुरयमर्जुनो मारयति मनुष्यान्। नास्योपद्रवस्योपशमः सामान्यशक्तिभाजा नरेण कर्त्तुं शक्यः, किन्तु समयमासाद्य केनचिन्महामहिम्ना मनुष्येण साम्यमेष्यतीति" अथान्ते विफलायासेन तदुपप्लवविप्लुतेन पूर्णप्रजावत्सलेन पार्थिवेन पूर्यामित्युदघोषि—"कोऽपि चिरजिजीविषुः पुमान् मागात् नगर्या बहिर्गुणशीलोद्यानदिशि। यदि कश्चिदगमिष्यदज्ञाततया स्वबलावलेपेन वा तममारयिष्यद् गर्जयन्नर्जुनः कृतान्ताकृतिः, सोऽभविष्यच्च चिराय तत्रैव भूशायी।"

इदमाकर्ण्य सावधानाः सर्वेऽपि पौरास्तस्यामाशायां[3] नहि जिगमिषाम्बभूवुः। किन्तु केचन दुःसाहसमासाद्य, केचन कौतुकनिरीक्षणपराः, कतिचन दिङ्मूढतया, काचिन् मृत्युमप्यवगणयन्ती कार्यव्यग्रा वृद्धा, काचिच्छगणानयनलोलुभा बालाः, काचिद् गोरसाद्यानयन्ती चाभीरी, कतिचन परसन्निवेशादागच्छन्तः पान्थाः[4] शाकटिका[5] वा दैवादर्जुनप्रतिज्ञामपूपुरन्।

इत्थं पञ्चमासत्रयोदशदिनानि यावत्प्रत्यहं सप्त-सप्तजनमारणप्रह्वेण अत्यन्तनिष्ठुरचेतस्केनाऽऽततायिनार्जुनेन एकादशशतैकचत्वारिंशज्जनाः समूलमुज्जासिता विशसिता जीवनाच्च्याविता श्च। हा! कीदृक् चाण्डलिकी वृत्तिश्चण्डाशयानाम्!

इति श्रीचन्दनमुनि-विरचित आर्जुनमालाकारे गद्यकाव्ये कामुकाऽऽलाप-
कामगर्हाऽर्जुननियन्त्रण-वनिताबलात्कार-कुपितार्जुन-
कृतयक्षगर्हा-कामुकहनन-साक्षेपनारी-
मारण-नित्यसप्तजनहननात्मकः-
तृतीयः समुच्छ्वासः

---

१. प्रयत्न कृतः   २. अनुसन्धानमकारि   ३. दिशि
४. अध्वगा   ५. ये शकटवाहकाः

चतुर्थः समुच्छ्वासः

निन्दन्तु नीतिनिपुणा यदिवा स्तुवन्तु ।
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ॥
अद्यैव वा मरणमस्तु युगान्तरे वा ।
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

—(भर्तृहरिः)

पर्यायरूपेण प्रतिसमय वस्तु परावर्त्तनमाकाङ्क्षति । उत्पादव्यय-ध्रौव्यात्मिका त्रिभङ्गी विविधभावभङ्गीभिस्तरङ्गयति कृत्स्नामपि विश्वस्थितिम् । यथा वल्गद्वातवीचिपारिप्लवानि भौतिकसुखानि विलसन्ति तद्वद दुःखान्यपि क्षणिककक्षां लक्षयन्ति । वस्तुतः—यत्सुखं तदेव दुःखम्, यद् दुःखं तदेव सुखम् । सुखमिवदुःखमप्यावश्यकं मन्यन्ते मनस्विनः । मधुवन्निम्बमपि पीत्वा पेप्रीयन्ते रोगोपशममिच्छवः । सुखे हर्षोत्कर्षपरवशा हि दृश्यन्ते दुःखे दैन्यमुद्वमन्तः । अतः साम्यमेव काम्यमामनन्तो महर्षयो जीवन्तोऽपि मुक्तिसुखलेशास्वादमनुभवन्ति ।

तेन रोषपरवशेनार्जुनेन भृशमुपद्रुता राजगृहपूर्जनता । यत्र कुत्रापि सम्मिलन्तः पौरा एतामेव कथां पप्रथिरे । कदेमं कष्टाऽकूपारं[1] तरिष्यतीयं पुरी ? कदैषा रक्तपानपिपासिता चण्डा मालाकारक्रूरच-ण्डी सौहित्यमासाद्य मुण्डं परावर्त्तयिष्यते ? अद्यापि नहि कान्यपीदृ-शानि चिह्नानि दृकपथमवतरन्ति, यथेयं व्यथाज्वाला शैत्यमुद्भाव-

---

१. कष्टसमुद्रम्

येत् । भगवन् ! किमस्माभिरीदृशि भूयांस्येनांसि[1] सञ्चितानि यैरेतादृशी भीमाऽऽपद्वल्ली प्रलम्बायमानैव जाजायतेऽस्मदुपरि । एवं सर्वेऽपि तत्रत्या दुःखपङ्के आकण्ठमग्ना विकल्पतल्पे शयाना नित्यमुत्स्वप्नयामासुः ।

इतो भविनां भाग्यप्रभञ्जनैः[2] प्रेरिताः पर्जन्या इव, सांयान्त्रिका[3] इव च धर्मप्रवहणेन भवार्णवं स्वयं तरन्तो निजाश्रितान् तितीर्षून् तारयन्तः, ग्रामानुग्रामं विहरन्तः, परोपकृतिमयं जीवनं यापयन्तः, भगवन्तोऽर्हन्तः श्रीमद्वर्धमानस्वामिनो राजगृहस्य गुणशीलोद्याने पदार्पणं चक्रुः ।

तत्रभवतामागमनं धार्मिकचक्राय सूचयदिवाकाशे चचाल धर्मचक्रम् निर्द्वन्द्वाऽचलानन्तसुखाभिलाषिणो भव्या भगवतामंह्रिसरोजमाभेजानाश्चिराय नन्दन्तीत्यावेदयन्निव देवदुन्दुभिरुच्चैर्नभस्तले नदितुं लग्नः । चलद्धर्मचक्रं शब्दायमानं च सुरदुन्दुभिं निरीक्ष्य पुनराकर्ण्य नृपेण नागरिकैश्चेत्यबोधि- "नूनमत्रभवन्तश्चरमतीर्थङ्करा आर्यदेवार्याः समागताः, गुणशीलोद्यानभूभागमलंकुर्वाणास्तिष्ठन्ति । अर्जुनभिया तत्र गन्तुमप्रभूष्णवः श्रेणिकाद्याः समेऽपि श्रद्धालवो जनास्तत्रस्था एव प्रभुं यथाविधि ववन्दिरे, हर्षोत्कर्षतया तुष्टुविरे, धैर्यमवधीरयन्तश्चाभिदधिरे--"भगवन् ! वयं भृशं भीरुका भवन्तं भवनस्था एव भजामहे, नहि साक्षात्कारं कर्त्तुं च क्षमामहे । धन्य-धन्यः सोऽपि कश्चित्समयः समेष्यति यदा श्रीमता मुखचन्द्रं साक्षाद् प्रेक्षिष्यामहे चरणयुग्मं च शिरसाभिवन्दिष्यामहे ।"

अथ सुदर्शनश्रेष्ठिनापि व्यलोकि चञ्चद्धर्मचक्रं अश्रावि च देवदुन्दुभिनादो यदा, तदा भगवतां मङ्गलमयमागमनं स्वचेतसि निश्चितम् । हर्षप्रकर्षेण विकस्वरवदनकमलो रोमाञ्चकञ्चुकितः परमार्हतो विमलदर्शनः सुदर्शनो विचारयितुं लग्नः—"धन्योऽद्यतनो वासरः स्वर्णमयेन रविणा प्राकट्यं नीतः । धन्येयं मङ्गलमयी वेला, धन्येयं श्रेयोघटनपटीयसी घटिका, धर्मदक्षैश्च प्रतीक्ष्योऽयं क्षणः, येषां नामधेयश्रवणमात्रेणापि कृतार्थाः स्युः प्राणिनां सार्थाः; तेषां महमद्य साक्षात्कारं करिष्ये । किमतः परं शुभं विभाति विश्वस्मिन् विश्वे ? श्रेयःसलि-

---

१. पापानि   २ भाग्यपवनैः

३. पोतवणिजः

लसिक्तः फलितमद्य मम भाग्यतरुः । गुणरत्नानां निधिरद्य मम सन्निधिं प्राप्तः ।" इत्थं परामृशन् सुदर्शनो भगवद्दर्शनाय सज्जो बभूव । सज्जीभूत परमहृष्टमानसं प्रस्थानोन्मुखं पुत्रं प्रविलोक्य पप्रच्छतुर्मातापितरौ—"नन्दन ! क्वाद्य प्रस्यातुमनाः सज्ज इव दृश्यसे ? किं किल केनापि सहचरेणाऽऽमन्त्रितोऽसि भोजनाय ? उता¹ऽन्यस्यां कस्याञ्चिद् धार्मिकसभायाम् ? अन्यत्र कुत्राप्यथवा जिगमिषा तावकीना ?"

करौ कुड्मलीकृत्य सुदर्शन—"नहि पितरौ ! अहं तु श्रीमतां मम परमाराध्येष्टदेवताना महावीरप्रभूणा दर्शनार्थमुत्कण्ठितोऽस्मि । तत्रैव जिगमिषुरहं शुभाशिषा वर्धनीयः" ।

भयमाविर्भावयन्तौ पितरौ—"किमुदितम् ! दर्शनार्थं गुणशीलोद्याने ? आलप्यालमिदम् !! विस्मृता किमुत मालाकारस्य नृशंसता ? सूनो ! कस्य न वल्लभतमं भगवद्दर्शनं वर्वर्त्ति ? निर्द्वन्द्वं तच्चरणद्वन्द्वं कस्को न स्प्रष्टुं स्पृहयेत् ? शमथपथं प्रदर्शयन्त्यः सुधारसकिरस्तद्गिरः न कस्य कर्णजाहं पुनते ? किन्तु समयवैपरीत्यमुज्जिहीते, विरुणद्धि च प्रतिष्ठासुभिः पञ्चजनैः समम् । कुलकेतो ! अहरहो जाजायमानहत्याकाण्डं नाकर्ण्यते किमुत ? सद्मनि-सद्मनि बोभूयमानमाक्रन्दनं नास्कन्दति² किमुत तव कारुण्यसरोवरम् ? सन्ति भगवन्त केवलज्ञानभाज । प्रतिसमयं विलोकन्ते करामलकवल्लोकालोकभावान् । रहसि विहितमपि प्रेक्षन्ते ते साक्षात्कारतया प्रक्षीणज्ञानावरणा । अन्वयदिवाकर ! भावबुभुक्षिता हि भवन्ति महात्मान., नहि बाह्याडम्बरं विशिषन्ति सात्त्विकवृत्तयः । अतो विरम विरमामुष्मादसामयिककृत्यात् । अत्रैवाषित्वा भक्तिप्रह्वतया भगवन्तमत्यन्तशुद्धमनसा सविनयं प्रणंनम्यस्व, स्तोत्रादिपाठैरभिवादयन् रमस्वात्मानन्दे, पुषाण पुनराध्यात्मिकी पद्धतिम् । नूनं सम्यक्तया भविष्यति तव विधेयस्य³ विधिवद् विहिता वन्दना, नात्रसंशयावकाशः ।"

अव्यग्रतया सुदर्शनः—"मातर पितरौ ! किमुद्भाविता भवद्भ्या भीरुभावं भजमाना भारती⁴ ? महावीरानुयायिना युज्यते किमेतादृशी कातरता ? ये वर्धमानस्यान्तेवासिनो दृढश्रद्धालव. श्राद्धा. सन्ति तेषां नहि कुत्रापि साध्वसम्⁵ । तद्वचनमवचनीयतया समाचरन्तो मृत्युमुखेऽपि

---

१. उत-विकल्पे　　२. शोषयति
३. विनीतस्य　　४. वाणी
५. भयम्

सुखमासादयन्ति निर्भीकतया श्रावकाः। आवीचिमरणापेक्षया प्रतिपलं म्रियत एव प्राणी। कवलीकृतान् जेगिल्यमानः क्रोडीकृतान् कथं त्यक्षति त्यक्तदयः समवर्त्ती ? अध्रुवाणामसूनां कृते ध्रुवं धर्मं चेत् परिजह्यां तदा को मादृशोऽन्यो मेदिन्यां देवनांप्रियः ? अविनश्वरात्मिकसुखहेतवे नश्वरान् प्राणानुत्सृज्येयं तदा तु चिराय चारभटचक्र—चक्रवर्तित्वमाचरेयम्। पूज्यौ ! पुनरिदमवधेयम्—यदहं सौवात्मनि जन्तुमात्रेषु मैत्रीं परिसूत्रयामि तर्हि मया सह कः प्रत्यवस्थास्यते ? यदहं सुतरां सर्वसत्त्वेष्वभयं भजामि तदा को मां भापयितुं प्रभुः ? यर्हि कृत्स्नामपि महीमहं बन्धुतया निबध्नामि तर्हि को मां विरोत्स्यति निष्कारणम् ? नालोकितं किमु परमकारुण्यप्रतिष्ठितानां जिनेन्द्राणामुपकण्ठे यद् सिंही सारङ्ग-शिशुं स्निह्यति। नहि गर्जति मारयितुमुन्दुरुमपि मार्जारी। नकुलोऽपि नहि व्याकुलयति व्यालचक्रबालम्। अहह ! नित्यवैरिणोऽपि वैरमुत्सार्य वृण्वन्ति हार्दिकसोहार्दम्। अहमपि तेषामेव शिष्योऽस्मि। यद्यपि नहि तादृशी पराकाष्ठा बिभ्राजते मदीया तथापि तद्ध्यानपरे मयि तादात्म्यसम्बन्धेन सम्पत्स्यते सैव शक्तिरित्याशासे निःसंशयम्। जनकौ ! तात्त्विकदृशा विलोकनेन नहि अजरामरस्य जन्तोर्जायते जातुचिदपि मरणम्। जीर्णवाससां परित्यागे नहि कष्टमुट्टङ्कयन्ति निष्टङ्कितान्तःकरणाः सुकृतिनः कृतिनः। वीरोपासकौ ! अतो जिनेन्द्रदर्शनोत्सुकं पौरस्त्यमङ्गलमाचरन्तमकुतोभयममुं पुत्रं निःशङ्कतया मुदाऽऽज्ञापयताम्[४] वर्धापयता वर्धमानानन्दौ शुभकार्यमाद्रियमाण चैनम्।"

जननीजनकौ प्राणप्रियस्य सुदर्शनस्य विलसद्वीरत्वं क्लिश्यत्कातरत्वं चारुविचारचतुरस्रं विहिताऽऽयतिहितरचनं वचनं कर्णातिथीकृत्य तस्य निश्चलतामुन्नयन्तौ अन्तर्भीतावपि "यथासुखं कुरु" इत्युच्चार्य तुष्णीं भेजतुः।

अथ सानन्दमनाः सुदर्शनः पादचारेण वीरदर्शनार्थं प्रतस्थे। उत्तरासङ्गादिशोभितां दर्शनोचितां वेषभूषां विलोक्य मार्गे मिलिता अनेकशः सवयस्काःप्रस्थानकारणं जिज्ञासाञ्चक्रिरे। तन्मुखाद् वीरसाक्षात्कारायेति निशम्य सर्वेऽपि स्तब्धाश्चित्रलिखिता इवाऽभवन् अवदंश्च प्रेमसरःस्नातया वाचा—"सखे ! नायं कल्याणकारी कालस्तत्र गन्तुकानाम्। समयमजानाना विज्ञा अपि मूर्खशेखरतामादधते।

---

४. द्विवचनम्

भगवन्तोऽत्र बहुधा समागताः समेष्यन्ति च। मङ्गलमातन्वत्तद्दर्शनं न वयं निषेधचिकीर्षः, किन्तु तद्दर्शनस्थलं कः प्राप्स्यति, पथि पूर्वमेव दारुणोऽर्जुनः साक्षाद् यम इव दर्शनं दास्यति करस्थेन मुद्गरेण प्राणान्तं च दर्शयिष्यति। मित्र! मन्यस्वाऽतोऽस्मदीयामात्मनीनां शिक्षाम्।"

स्मयमानः सुदर्शनः—"अत्यदभुतम! मञ्जुमन्त्रणा मित्रवर्याणाम्। सहचराः! किं निर्मास्यध्वे यूयं जगत्कल्याणाय येषामियान्निर्बल आत्मा? इयान् मरणातङ्कः? कालस्तु कल्याणकारी कल्याणकर्मणा भविष्यति, नहि कल्याणकल्पनया। उद्योगिनःकर्मठा नाऽनेहसं प्रतीक्षन्ते, प्रत्युताऽनेहा तानीहमान उत्तिष्ठते[1]। वदन्ति विद्वांसस्तु—"शुभस्य शीघ्रमिति" न जाने आगामिकः समयः कीदृशः समेष्यति? समयोऽमूल्यधनम्। समयो महत्साधनम्। समयं सिषाधयिषूणां सिद्ध्यन्ति सर्वाणि कार्याणि। किञ्च, ग्रामान्तरेऽप्यागतान् प्रभून् निशम्य बहुधा दर्शनार्थं यामि, तदत्रैव विराजमानान् देवार्यान न कथं पर्युपासे? नहीदृशो मन्दभागधेयोऽहं यन्मृत्युविभीषिकयाऽऽत्मानमपि जिनदर्शनाद् वञ्चयेयम्। सखायः! क्लिष्टाध्यवसायेषु तु बहुशो व्यापन्नं मया, किन्तु नाऽभूत्किमपि भद्रम्। अद्य चेदर्जुनमुद्गरप्रहारेण भगवल्लयलीनस्तद्ध्यानैकतानो विधूतसर्ववासनो म्रियेय तदा किमतः परं भव्य भावि? स्निग्धाः! मा स्म वहन्मुधा खेदम्, सुनिश्चित वरेण्ये कारणे वरिष्ठं कार्यं वर्तिष्यते।" इत्थमतीव तदात्मदार्ढ्यं मन्वानाः सर्वेऽपि सखायः "शुभं भूयात्" इत्याचक्षाणाः पथपार्थक्यं प्रापुः।

विद्युच्चमत्कृतिरिवैषा प्रवृत्तिः समस्तेऽपि नगरे विस्तृता। तत्र कतिचन जना व्रजन्तं सुदर्शनं वीक्ष्य तत्कृत्यमनादृियमाणा सव्यङ्गमुपजहसुः।

आस्ये हास्यलास्य दर्शयन्नेकः—अद्य क्व प्रस्थिता इमे महात्मानो मित्र?

द्वितीयः—न जानासि किम्? इमे भक्ताः प्रस्थिता भगवद्दर्शनार्थं तत्पादस्पर्शनार्थं च।

साट्टहासं तृतीयः—मृषोद्यमिदम्, किन्तु वदेत्थं भद्र! मृत्युदर्शनार्थं भूमिघर्षणार्थमर्जुनहर्षणार्थं च।

---

१. उदोऽनुर्ध्वचेष्टायामित्यात्मनेपदम् ("तैयार रहता है" इतिभाषा)

ससिंहतालशब्दं पुनरपि द्वैतीयीकः—मूर्खोऽसि त्वं तु, भक्तानां चिकुरमपि वक्रयितुं कोऽपि कोपी[1] नालम्। मृत्युमुखे तु त्वादृशा मादृशाः पापीयांसः पतन्ति।

पुनस्तार्तीयीकः—वरं-वरं, क्षमस्व-क्षमस्व, आशातिता महामनसो मया।

पार्श्वस्थितस्तुर्यः कश्चित्—तदा त्विमे भक्ता नगरोपद्रवं शामयितारः?

पौरस्त्यः—नगरोपप्लवस्तु शमित एव विद्धि, यदेदृशा भक्ता गच्छन्ति।

द्वितीयः—अवश्यमवश्यं स्वयमेव शान्ता भवितारः स्वर्गं पवित्रयितुम्।

साट्टहासं हसन्तः सर्वेऽपि—अनवसरज्ञोऽसि त्वं तु रङ्गे भङ्गमापादयसि।

चतुर्थः—ईदृक्षा अवसरा अपि जातुचिदेव मिलन्ति।

प्रथमः—'आम्' 'आम्!' जनानां सङ्कुलता नास्ति मनागपि मार्गे।

द्वितीयः—अहह! विज्ञातम्-विज्ञातम्! विजने भगवद्भिः सह वार्त्तायाः सम्यगवसरो मेलिष्यति, बहूना मध्ये सूक्ष्माणां प्रश्नानां समाधानं भवत्येव नहि।

सर्वेऽपि—ईदृशाः प्रस्तावा भक्तैरेव लक्ष्यन्ते नापरैः।

प्रथमः—ईदृशाः भगवद्भक्ताः कियन्त सन्ति समस्तेऽस्मिन् पत्तने?

तृतीयः—केवल पञ्चषा[2] एव भक्तसत्तमा[3] वर्तन्ते।

सविस्मयं द्वितीयः—तर्हि पञ्च कुत्र पञ्चत्वं प्राप्ताः, कथमनेन सार्धं न सम्मिलिताः?

तृतीयः—दुर्मुखोऽसि त्वम्, पञ्चत्वं कुत्र प्राप्ताः, अर्जुनेन नामशेषतां नीताः।

द्वितीयः—अहो! अहो!! नामशेषतामासादयितुमयमपि प्रयतते।

---

१. क्रोधी। २. पञ्च वा षड् वा।

३. भक्तश्रेष्ठा

प्रथमः—किं विचित्रमिदम्? नामशेषा एव संसारे जीविताः सन्ति, अन्ये तु त्वादृशा जीविता अपि मृतप्रायाः।

द्वितीयः—त्वादृशा अपि।

तुरीयः—तर्हि गच्छन्तु-गच्छन्तु, भवन्तु शीघ्रं यशःशेषा इमे महात्मानः।

कतिचन भद्रप्रकृतयो धार्मिकाः सुदर्शनं यान्तं दृष्ट्वा परस्परमिदमालेपुः—"धन्योऽयं पुण्यात्मा सुदर्शनो यन्मृत्युभयमप्यवगणय्य वीराग्रणीर्महावीरदर्शनाय प्रस्थितः। धन्याऽस्यप्रसूर्यया ईदृक् पुत्ररत्नं प्रसूतम्। प्रशस्याऽस्य धर्मनिष्ठा यदापत्स्वपि नहि कर्तव्याद् विरिरंसा।[1]

केचन सुजनास्तु सहानुभूत्यर्थमागोपुरं सुदर्शनेन सार्धमपि प्रचेलुः। पुनः कतिपये मृगा इव कुतूहलाकुलाः सुदर्शनस्यानुपदं शनैः शनैरसरन्। योगीश्वर इव सुदर्शनः स्तुतौ निन्दायां साम्यं सेवमानोऽथ पुरगोपुरं प्राप। सहयायिनः सर्वेऽपि पारावारतटस्थपुरुषा इव तत्रैव तस्थुः। दृश्यदर्शनोत्सुका केचन गोपुरस्योपरितनभागमध्यूषुः। प्रेत्य भवेऽसुमान्निर्वैकाकी पुराद् बहिः सुदर्शनः सुकृतसहायश्चचाल। तदा मूर्तिमानिव शान्तरसेन संपृक्तो वीररसः, एकत्रित इव धैर्यराशिः, अवतरित इव दृश्यो धर्मः, कल्पितकाय इव कारुण्यभावः, जङ्गम इव गुणरत्ननिधिः, प्रत्यक्ष इव नियमः, महावीराभिमुखं गच्छन्नयं गोपुरस्थैर्जनैरतर्कि।

इतः प्रत्यहं सप्तजनव्यापादनव्यापृतहस्तः कोपविहस्तः प्रवृद्धक्रौर्यविचारः शरारुरर्जुनोऽरण्ये मृगयामन्वेषयन् व्याध इव गुणशीलोद्यानद्वारि स्कन्धे मुद्गरमाधाय कमप्यागन्तुकं प्रतीक्षाञ्चक्रे। निर्भयमायान्तं सुदर्शनं विलोक्य हृष्टमना विकल्पयितुं लग्नः—"अहह! आगच्छति कश्चिन्मम प्रतिज्ञां पूरयितुं प्रथमः पिण्डः।[2] अत्याश्चर्यमिदम्!! यत्प्रायोऽज्ञातपरासनरहस्या[3] हि जना मत्सामीप्यमासेवन्ते, अन्धा इव च मरणान्धकूपे निपतन्ति। अद्य तु विदितविश्ववृत्तान्त इव मुमूर्षुः कश्चिन्मम सम्मुखीनो वर्वर्त्ति। हन्त! अक्षतनिधेर्विधेः कः पारं प्राप्तुं पारयेत्? पतितोऽप्यजगरः कुक्षिम्भरि-

---

१. विरन्तुमिच्छा। २. पिण्ड-ग्रासः।

३. परासनम्—हननम्।

र्भवेत्। केवलामिषभोजनव्रतोऽपि केसरी प्रतिघस्रं घस्मरः स्यात्। मुक्ताफलचर्वणचलच्चञ्चूनां विशदवंशानां कलहंसानामपि तर्पणं कणेहत्य[1] जायते। अहो! जनार्दनपराक्रमं मां यद्यपि जानीते जगत् तथापि सार्धपञ्चमासा व्यतीयुः प्रत्यग्राः[2] सप्तव्यक्तयो मम सकाशात् कृतान्तकवलतां कलयन्त्येव।"

उम्![3] उपोद्यानमाप्तोऽयं मृतप्रायः। कीनाशदेशं प्रेषयाम्येनमधुनैवेति निश्चिन्वन् मुद्गरमावर्त्तयन् अधीराणां धृतिं विधुरयन् दधावे।

सहायुधं दानवमिव धरित्र्यां धावमानमर्जुनमालोक्य गोपुरस्थाः सर्वेऽपि भयद्रुता अजनिषत। हा! हा!! क्रोडीकृतोऽयं[4] प्रियदर्शनः सुदर्शनः श्राद्धदेवेन[5]। अविलम्बितमस्य जीवनं लम्बमध्वानमालम्बिष्यते। पापिष्ठमालाकार! कुत्रापि समयं नहि वेवेक्षि? स्वौद्धत्येन सर्वत्र साम्यमापादयसि? कीदृशानि कीदृशानि नररत्नानि च प्रत्नेन्द्रिय[6]-मन्दिराच्च्यावयसे? अनारेकणीया[7] खलु निर्विवेकानां प्रवृत्तिः। सुधीस्तु प्रतिपदं सदेग्धि किमपि विधातुम्। नहि मातृमुखानां[8] सम्मुखे वैदुष्यं वीर्यं कौशलं च दर्शनीयं कदापि निपुणैः। ग्रामटिकानिवासी जडाकृतिर्जनः किं जानाति प्रस्फुरत्पाटवं विदुषां विद्यावैलक्षण्यम्। पाटलवाटिकायां प्रविष्टोऽपि चक्रीवान्[9] किमु नामोदमोदमुदास्ते? कदलीकानने कृतावासोऽपि करभः किमु रम्भावल्भनप्रागल्भ्यं वल्गयेत्?

ऐक्षिष्ट सुदर्शनोऽपि मुद्गरमुल्लालयतः साक्षात् कृतान्तनृत्तं नाटयतोऽर्जुनस्यागमनम्। सत्वरं तत्रैवोर्ध्वदमो भूत्वा निर्भयभावनया विभावयितुं लग्नः—"आगादयं रोषपरवशो दयनीयदशो जनान् तर्जयितुकामोऽर्जुनः, किन्तु नहि व्यापादयितुं शक्यते क्रुधा दारुणः क्रोधदानवः। वष्टि स इन्धनसङ्घातेन कृष्णवर्त्मनः शमनं यो विरोधं प्रतिशोधेन प्रशामयितुमिच्छति। नहि कण्डूतिकरणेन साम्यमापादयति पामा। प्रतिकूलेन धर्मेणाऽनुकूलनीयं प्रतिकूलं वस्तु,

---

१. मनोहत्य। २. नव्याः।
३. उमिति रोषोक्तौ। ४. आलिङ्गितः।
५. यमेन। ६. प्राचीनशरीराद्।
७. असंशयनीया। ८. मूर्खाणाम्।
९. गर्दभः।

नहि तदनुकूलेन। जलमेवानलं शीतीकर्त्तुमलम्। वैश्वानरो हि शैत्यं शातयितुं शक्तः। क्षमैव कोपगदस्योत्कृष्टमौषधम्। सत्यमुक्तमेकेन नीतिज्ञेन "क्षमैव परमः प्रतिशोधः।" क्षमा शूराणामलङ्कृतिर्नात्र कातराणामधिकारः। अत एवाहमपि क्षमावर्मितो भूत्वा रचनात्मकोपदेशेनैव रोषमस्य शेषदशां नयामि, नहि वागुपदेशस्याऽवसरः साम्प्रतम्। इति ध्यात्वा तत्कालमेव करौ कुड्मलीकृत्य भगवन्तं महावीरं प्रभुं प्रणम्य व्यजीज्ञपत् "भगवन्! त्रिकालदर्शिन्! त्वद्दर्शनं विधित्सुरहं बाह्योपसर्गमभिमुखमासाद्य त्वच्छाक्ष्यतः नहि यावत् त्वत्साक्षात्कारं कुर्वे तावत्कालमभिव्याप्य क्षणभङ्गुरमङ्गमिदं व्युत्सृजामि, चतुर्विधाहारमपि प्रत्याख्यामि, सर्वाऽसुमद्भिः सह मैत्रीं च सूत्रयामि। त्रिजगत्पते! अद्यैव मम परीक्षावासरो लब्धावसरः। कृपार्णव! वितरेदृशीममोघशक्तिं यथाहं जगतां पुरतः प्रोन्नतकन्धरः स्थितिमाप्नुयाम्, आर्हतानां महदादर्शं दर्शयेयं, प्रकटयेय च तव सर्वातिशायिमहिमानम्। अनन्तशक्तिधर! छात्राणां परीक्षोत्तीर्णता भवत्यध्यापकानामपि महत्वप्रदर्शिनी। जायते सैनिकानां विजये हि सेनापतेर्विजयः। पुत्रस्य श्लाघा हि पितरं श्लाघते। अमन्दानन्दमय! तव कृपापीडमिलन्मौलिरहं नितान्तनिर्भयोऽस्मि, वासनानिर्वासनेन पूर्णसुहितोऽस्मि, त्वच्चरणात्मार्पणतया चाऽत्यन्तसुखितोऽस्मि। अयि धैर्यधोरेय! त्वदुपदेशामृतप्रीणितानां ध्यानं कः क्षोभयितुं क्षमः? त्वच्चरणकमलचञ्चरीकाणां चित्तं कश्चालयितुमलम्? इत्थं स्वान्तपरिणति[1] विशदयन् रत्नसानुरिवाऽकम्प्रपदः समाधिस्थयोगीन्द्र इव निमीलितनयनयुगलस्तत्रैवोत्तस्थौ।

इति श्रीचन्दनमुनि-विरचित आर्जुनमालाकारे गद्यकाव्ये भगवदागमनं सुदर्शनस्य दर्शनार्थं सज्जीभवनं, पित्रोर्निवारणं, पुत्रस्य प्रत्युत्तरणं, केषाञ्चित्सव्यङ्ग्यमुपहसनं, सुदर्शनस्याभितोऽर्जुनस्य धावनं, ध्यानस्थित्यवलम्बनं चेतिमुख्यवर्णनमाबिभ्राणश्चतुर्थः समुच्छ्वासः

---

१ मनःपरिणाम्।

पञ्चमः समुच्छ्वसः

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ?

—(भवभूति.)

अहह ! सप्तस्वपि भयेषु मरणभयं भयङ्करमनुभवन्ति भूमिस्पृश । आकर्ण्यापि कर्णाकर्णिकया कस्यचिन्मरणवृत्तान्त हिमानीकम्प कम्पन्ते जनानामन्त करणानि । अत्रागच्छन्त्य सर्वा अपि आशा आशा[1] इव शून्यतां सेवन्ते । सर्वेऽपि कल्पितमनोरथा अत्रैव तल्पशयाना जायन्ते । विश्व जिष्णूनामत्रैव शोश्रूयते पराजयडिण्डिमः । परन्तु ये मृत्योरपि न बिभ्यति, कालस्याग्रतोऽपि नहि वैकल्यमाकलयन्ति, तेषां वीरोत्तंसानां क्व भयम् ? क्व तेषां निरीहाणां पराभवसम्भावना ? अस्तु, कूटस्थनित्यमिव स्थेमानमाभेजान विनिर्गताऽऽतङ्ककलङ्क शशाङ्कमिव क्षरत्कारुण्यामृतवर्षं सुदर्शनं दर्श-दर्श नेदिष्ठमागतो गर्जन्नर्जुनश्चेतसीदं व्यचिन्तयत्—"अहो ! नाद्राक्षमेतादृक्षं विक्रान्तकोटीकोटीरायमाणं मर्त्यमहम् । यो ममाग्रतोऽपि त्रोटितभयमुद्रां ध्यानमुद्रां निश्चलमवलम्बते । धावनक्रन्दनादिकथा त्वास्तां दूरेण, वैवर्ण्यमपि नहि वृणुते बतास्य वदनारविन्दम् । विलक्षणोऽयंमनुष्य, विलक्षणमस्य शैलस्पर्धि धैर्यम्, चित्रणीयाऽस्य सहिष्णुता, प्रशंसनीयाऽस्य तल्लीनता, विलोकनीयाऽस्याऽलौकिकी च स्थितिः ।

---

१. दिश इव ।

आः ! किमयं स्थाणुरुत पुरुष ? नरो वाऽय नाकी ? चेतनो वाऽयं जडः ? हन्त ! नहि किमपि निश्चेतुं शक्यते । अन्ये त्वन्यदा दारुणाकृतिं दूरतोऽप्यभिमुखीनमाकलय्य मां कान्दिशीकतां दर्शयन्ति । "मां मामीमरः मां मामीमर" इत्युच्चैः पूत्कुर्वन्तश्च मृतप्राया मिलन्ति । कतिचन मां निभाल्य क्रोधोध्माता आचिक्रमिषवो[1] मयि स्वबलावलेपमुद्वहन्त सांयुगीनतां[2] व्यञ्जयन्ति । अपरे मद्गर्जनामारादेव[3] कर्णातिथियन्तो यमस्याऽतिथ्यं चाद्रियन्ते । किं जातमद्य ? प्रत्यह जाजायमाना घटनाः समूलं वैपरीत्यमनुधावन्ति । अहो ! अस्य मुखं न क्रोधं, न भयं, न दैन्यं न दम्भ च व्यनक्ति । किन्तु प्रेमाऽऽसारधाराभिः मद्रोषदावं शीतीकर्त्तुमुत्सहते । अरे ! रे !! अपसर-अपसर, याहि-याहि, अलं तवाधुना बकध्यानेन । शतशस्त्वादृशा भक्ता मृत्युतीर्थमवतारिता अमुनाऽर्जुनेन ।" इत्थं साऽन्तर्जल्पं बहु विकल्पयन् स पापीयान् तदानीमेव सुदर्शनविग्रहं परासुं[4] दिदृक्षुः कृपाकृपणाभ्यां कराभ्यां मुद्गरमुदतूतुलत् ।

भव्याः ! कस्तं चालयितुं, क्षोभयितुं, मारयितुं वा प्रभुर्यस्य धर्ममहाराजो जागरूको रक्षायै बद्धलक्ष्यो विराजते । धर्मकल्पतरोः सान्द्रच्छायायामासीनानां नराणां दुःखानि वैमुख्यमाख्यान्ति । सुखानि सान्निध्यमध्यासते । हर्षः प्रकर्षमियर्ति । विषादो बाधामासादयति । सम्पदः प्रतिपदं परिष्वजन्ते । विपदो नास्पदमास्तिघ्नुवते[5] । जनाः ! एतादृशं निष्कारणकरुणापरं महारक्षकं संप्राप्यापि कथमितरच्छरणमीहमानाः कृच्छ्रपात्राणि भवथ ? न कथं धर्ममहामहीपस्य चरणे सर्वस्वमुपदीकुर्वन्तो विश्वसथ । त एव मूढा जगति घात्यन्ते, पात्यन्ते, हन्यन्ते, मार्यन्ते च ध्रुवं धर्मशरणमनाद्रियमाणा भ्राम्यन्ति, निश्चलं अनासेवमानाः प्रगल्भन्ते ।

अस्तु, उर्ध्वीकृतगदो जागरूकमदोऽर्जुनो धर्मप्रभावतो भगवदनुभावतो वा नहि गदां निम्नयितुं शशाक । अहो ! वीक्षन्तां क्षणं दक्षाः ! प्रेक्षणीयमिदानीतनर्महिंमाहिंसयोर्निर्द्वन्द्व द्वन्द्वम् । इतस्तु मालाकारस्य जगद्ग्रसनोत्सुका कोपाध्मातलोचना निष्कृपं दन्तच्छदौ दशन्ती[6] गृही-

---

१. आक्रमणं कर्त्तुमिच्छव ।
२. रणे साधुताम्, "सायुगीनो रणेसाधु" रिति हैमः ।
३ दूरादेव । ४. मृतम् ।
५. ष्टिघङ्त् आस्कन्दने आङ्पूर्वः प्राप्त्यर्थे ।
६. दंशसञ्जोरपि इति न लोप ।

तकदाग्रहा सविग्रहा हिंसाराक्षसी। इतस्त्रैलोक्येऽपि मैत्री सूत्रयन्ती सत्प्रेमप्रोत्फुल्लनयनाभ्यां महदाकर्षणमाक्षिपन्ती जगद्विजयिनी परम-पूता साकारा सुदर्शनस्याऽहिंसा देवी। प्रोच्छलन्ती हिंसाराक्षसी वष्टि दयादेव्या उपरि स्वतन्त्रं स्वाधिपत्यम्। अभिलषति च कारुण्यपूर्णा दयादेवी निस्त्रिंशहिंसायाः समूलोज्जासनम्। काऽत्र विजेष्यते, का पराभविष्यतीति संदिहन्ति दुर्गस्थाः पञ्चजनाः। उत, पुष्करावर्त्त-स्याग्रतः कियत्कालं स्वबलावलेपं दर्शयेद्दावानलः? विबुधसेवितायाः सुधायाः पुरस्तात् कियत्कालं तिष्ठेद्धालाहलकोलाहलः? अहिंसादेव्याः पुरतः स्वकीयं शौर्यं तुच्छतां गच्छद् विलोकमाना निर्दयतादानवी समजनि किंकर्तव्यविमुखा। अथ पूर्णशारीरिक-मानसिकशक्त्या गदयाऽऽहन्तुं प्रयतमानस्याप्यर्जुनस्य नहि शुम्बमात्रमपि गदा निम्नत्व-मागात्, किन्तु व्यायामविधातुरिव करोत्थापिता एव शुशुभे। तदानीं विस्मितेन खिद्यमानेन च चेतसा व्यचिन्ति मालिकेन—"कोऽयं वृत्तान्तः। केयं घटना घटिता? कथमिव मम प्रयत्नः फल्गुतां वलयति? प्रथमोऽयमवसरो यन्मम प्रयासो विपर्यस्यति। बत! बत!! नितान्तमत्-साहाय्यमनुतिष्ठन् मुद्गरोऽपि कथमद्य मया सह शात्रवं सोसूत्र्यते? किमयं पञ्चमासत्रयोदशवासरैरेकादशशतैकचत्वारिंशत्संख्याकान् जनान् निघ्नान उद्विग्नतां गतः? उत, अस्य रक्तपिपासा सौहित्यमाप्ता? आहोस्विद्, अयमपि दयार्द्रीभूतहृदयः संभूतः? अरे! मुद्गर! चिराय सौहार्द[1] निबध्नन्नपि किमद्य विलक्षणतां कक्षीकुरुषे? त्वयि तु पूर्णं विश्रम्भो मम विलसति। त्वमेव चेत् विश्वासघातं विदधासि तदाहं कं शरणं प्रपत्स्ये? प्रारब्धकर्मणि नहि विश्रान्तिमीहन्ते महीयासः।

आ! ज्ञातम्, भीरुकमेव भीषयन्ते प्रायेण, निर्भयात् पुनः समेऽप्या-शङ्कन्ते। अहो! "देवो दुर्बल-घातकः" इति किंवदन्त्यपि चरितार्था-ऽद्य संवृत्ता। मुद्गर! त्वमेवाद्य निशङ्कं[2] वीराग्रणीं पुरुषपञ्चानन-मभिमुखीनमभिगम्य चापल्यमुत्सार्य स्थैर्यमाश्रितोऽसि. न कथं दैनन्दिनं[3] कार्यं निष्पादयसि"? इत्थमान्दोलायितचेताः क्रोधाभिमानसंपृक्तमतिः क्रियासमभिहारेण पूर्णतरसा मुद्गरं न्यक्कर्त्तुमुदयँस्त, किन्तु दरि-द्रकल्पना इव सर्वा अपि चेष्टा नहि स्वेष्टं जघटिरे।

---

१. मैत्रीम् २. नरम्

३. दिने दिने क्रियमाणं।

इतो, वैराग्यपद्माकरे प्रेङ्खां निर्मिमाणः देवार्यचरणसरोजे रोलम्बवद् रममाणः पञ्चत्वमप्यनाशङ्कमानो योगिराडिव दार्ढ्यमाबिभ्राणः क्षणान्तरं सुदर्शनः परामृशत्—"अहो ! अधुनावधि न कथं घातुकेन मद्घातपातकं सञ्चितम् ? इयन्तं विलम्बं किमित्याललम्बे शरारुः ? अवितर्कितप्रवृत्तिभाजो भवन्ति हि हिंसकास्तु"। इत्थं समवदधता सुदर्शनेन कारुण्यपुण्ये नेत्रे समुद्घाटिते, व्यलोकिचोर्ध्वकृतमुद्गरोऽर्जुनः। जाते ह्यहिंसा-प्रतिष्ठिते श्रेष्ठिनः दृक्पाते तत्कालमेवाऽर्जुनवपुर्विरहय्य कम्पमानान्तःकरणः गृहीतहिंसापक्षो यक्षः पलायाञ्चक्रे। उदञ्चिते वा मरीचिमालिनि कथमिवान्धकार स्थितिमासादयेत् ? समुन्नते वा पतद्धारासारे पर्जन्ये किं नाम निदाघोद्राघीयस्तामुद्दीपयेत् ? समागते च पक्षिराजे दृक्कर्णः[1] कियत् फटाटोपं च स्फोटयेत् ? पलायिष्ट खलु मुखमदर्शयन्ती हिंसाराक्षसी। पर्यपूर्यत दिक्चक्रवालमहिंसादेव्या विजयघोषेण।

यक्षावेश- विरहितोऽर्जुनो झगित्येव मूर्च्छारोगिवद् भूमौ पपात। रक्तरक्तिमरक्तो मुद्गरोऽपि परपीडाकारिणा सुनिश्चित पतनमित्यावेदयन्निवैकतोऽपतत्। क्षमा वा मह्यं क्षमा दास्यतीति विचारयन्निव क्षमा शरणीचकार।

अथ दूरीभूतोपसर्गं परिपूर्णप्रतिज्ञ सुदर्शनस्तं यक्षावेशशून्यं मूलस्वभावमाविष्कुर्वाणमाकलय्य बन्धुत्वमाबध्नन्त्या भाषया भाषयामास- "भद्र ! किं भूमौ लुठन् परामृशसि ? उत्तिष्ठ, पश्य, च तवाग्रतस्तव बन्धुरुर्ध्वन्दमोऽस्ति। अर्जुन ! क्रोधं परित्यज, क्षमां चाद्रियस्व भ्रातः ! त्वया यक्षावेशपरवशेन घनं दुष्कृतमाचरितम्। कज्जलश्यामलमयशः सञ्चितञ्च"।

एवं सुदर्शनस्य वागमृतेन सिक्तः किञ्चित्प्राप्तचैतन्य इवाथाऽर्जुनो वितर्कयति स्म—"कोऽहम् ? कुत्रत्योऽहम् ? कुत्रागतोऽहम् ? किं कृत्यं मे ? कथमत्रपतितोऽस्मि?" शनैः शनैर्व्यपगतमदिरोन्मादमानववत्[3] स्वकीय नामकार्यादिकं संस्मरन् षण्णां नरापसदानां बन्धुमत्याश्च वधमाध्यायन् प्रतिदिनं सप्तजनव्यापादन च चिन्तयन् भीत इव जज्ञे। नूनमयं कश्चिन्नरपुङ्गवो वर्त्तते यो मधुमधुरया वाचा मामुल्लापयति। अस्य महामनसोऽनुग्रहेणैव मद्यक्षावेशो शेषतामितः। प्रणमाम्येनं

---

१. सर्पः। २. दिङ्मण्डलम्।

३ व्यपगतो मदिराया उन्मादो यस्य सचाऽसौ मानवस्तद्वत्

मनस्विनम्, पृच्छाम्यस्य मङ्गलमयमभिधेयादिकमत्रागमनकारणञ्च। इत्यालोच्य निद्रामन्थर इवोत्थितः स श्रेष्ठिनः पादौ प्रणमन् प्राञ्जलतया प्राञ्जलिरित्यन्वयुङ्क्त–"क्व वास्तव्याः श्रीमन्तः ? कानि कान्यक्षराणि पनीते भवतां शुभमभिधेयम् ? कथमत्र पदार्पणम् ? क्वाग्रे यियासा ?" इति जिज्ञासुरयं जनः।

तदानीं मार्दवपूर्णया वाण्या श्रेष्ठी प्रत्यूचे—"भ्रातः ! तत्रैव मन्निवासो यत्र यौष्माकीणः। "सुदर्शन" इत्याख्ययाऽऽख्यान्ति मां पुमांसः। भगवद्दर्शनार्थं चाहं प्रस्थितोऽस्मि। अध्वनि तव जिघांसुवृत्ति मंमन्यमानेन मया भगवद्ध्यानमारब्धम, तेषामनिर्वचनीयमहिम्ना सर्वमरिष्टं नष्टम्। त्वमपि औत्सर्गिकी दशामापन्नः।"

सारल्यतरलित समीचीनं तद्वाङ्मयमाकर्ण्य मालिकेन परामृष्टम्–अहो ! भव्यभक्तिरक्तानां भगवद्भक्तानामपीदृशी लोकोत्तरा शक्तिर्विलसति, यदेतेषां सम्मुखं वधविचारचतुरो महाक्रूरकर्मकारी यक्षोऽपि भियेव गृहीतदिग्, तदा त्रिलोकीमहितानामतिशयसहितानां किं नाम कथनम ? हन्त ! यक्षसेवाहेवाकिना मुधैव गमितो मया इयाननेहा, इयत्समयपर्यन्त चेद् वर्धमानं विभुमसेविष्येऽहम्[2] न जाने कियत्साफल्यमप्राप्स्यम्। खलु गतं किं शोच्यम् ? वर्तमानमेवाऽनुवर्त्तनीयमिति विचार्य सुदर्शनं प्रति क्लेशगद्गदया गिरा बभाषे—"श्रेष्टिवर्य ! मय्यपि दया निधाय निवेदयतु यत् के सन्ति ते पतितोद्धारप्रवणा महनीयचरित्रा महात्मानो भगवन्तो महावीरा ? यद्दिदृक्षया[3] भवान् मरणातङ्कमपि नाऽऽशशङ्के, मादृशे[4] पशुवृत्तयेऽपि च मानवतामदीदृशत्। अभिलषाम्यहमपि तेषां नयनामृतं दर्शनम्। सुहृद्वर्य ! किं व्यनज्मि मम मन्दमेधसो गर्हास्पदमनुष्ठितम् ? हा ! हा !! मुद्गरपाणेर्यक्षस्यावेशेन एकादशशतैकचत्वारिंशत्सख्याकान् जनान् व्यापाद्य घनाघनादपि कृष्णतरम् अयोघनादपि निकाचितम्, वज्रादपि कठोरतमम्, महारण्यादपि सान्द्रम् विषादपि च कटुकम्, निरयेणापि दुर्भोगं, पापं समचायि। हा ! हन्त ! नागरिका मह्यं क्रुध्यन्ति, मन्नामधेयं श्रुत्वापि [5]दरमुदीरयन्ति, दुराशिषा निर्भर्त्सयन्ति, कोपकषायितेनाऽक्ष्णा

---

१. पलायितः २. स्यदादेरात्मनेपदस्योत्तमपुरुषस्यैकवचनम

३. येषा दर्शनेच्छया ४. चतुर्थी ५. भयम्

मां वीक्षन्ते च । धिङ् माम्, धिङ् माम् । आः ! पापीयसा मया किमपि नाज्ञायि यत् षण्णां नराधमानामागसि[1] जागरिते नागरिकाणां किमाग. प्राग्भारः ? बत ! बत ! कतिचन पर्युपासनीया वर्षीयांसः,[2] भविष्योज्ज्वला दुग्धमुखा बालाः, कार्यभारवोढारो युवानः, मातृवत्पूजनीया अबलाश्च क्रोधान्धलेन मया दण्डधराय प्राभृतीकृताः । अथवा, रक्तद्विष्टानां देवानां सेवया न कथं सेवका रागरोषाकुलाः स्युः ? कारणानुरूपं हि कार्यमुद्भवति, कात्र विचिकित्सा[3] । वीतरागपर्युपासी सर्वत्र समदर्शी निर्मलाचारी भवान् समस्तैर्नागरिकैर्बन्धुतया विलोक्यते, प्रेमपूतया च दृष्ट्या सत्क्रियते । उताहो, किं चित्रमत्र ? येन कारुण्यपुण्यमेवोपदेशामृतं नितरां निपीतम्, कातरतां कर्त्तयन्ती वीरतामीरयन्ती मुद्रैवोन्निद्रमालोकिता, सर्वत्र साम्यं सूत्रयन्ती वैरं विधुरयन्ती च शिक्षैव सततं निशमिता[4] ।

अस्तु, परोपकारपरायण ! मामेव वीरोपकण्ठं नयतु, अधमोद्धारतत्परां तन्मूर्त्ति ममापि दर्शयतु, तदुपदेशपीयूषं च पाययतु । गुणिशेखर ! भगवद्दर्शनार्थं भवान् अस्यामाशायामागत इत्यहं न मन्ये, किन्तु मामेव प्रतिबोधयितुमना इह कृतागतिः इत्येव निर्णये ।

गुणज्ञ ! भवदनुग एवाऽहं, सुरासुरगमनागमनसङ्कुलम्, विराजमान साधुसन्दोहभासुरभूतलम्, तातप्यमानभूरितपस्वितपसोद्दिप्ततेजस्कम्, पेप्रीयमाणध्यानावलम्बितबाहु-वाचंयमविशुद्धवातावरणम्, त्रिलोकीपतिपवित्रितं तत्स्थलं प्रवेष्टुमलं भविष्यामि । अन्यथा मादृशमाततयिनं तत्र कः प्रवेशयिष्यति ? भवत्सङ्गमेन ममापि श्रेयः संवत्स्र्यति । निम्नभूभागमध्युषितमप्यम्भो गुणिघटेन सह उच्चैर्गतिमासादयति । पावनगुरुचरणसरोजसंस्पृष्टा धूलिरपि मानवानां मौलीनलंकुरुते, अतोऽधुनैव भवतु प्रष्ठो[5] भवान् भवाम्यहमनुगामी भवताम् ।

आर्यदेवार्याणामतितरां तस्य दर्शनचिकीर्षां मन्वानेन सुधयेव सिञ्चता, सुमानीव वर्षता च सुदर्शनेनाभाणि—"भद्र ! अलं विलम्बेन, तत्र जिगमिषुं त्वा कः प्रतिरोद्धुं प्रभुः ? तेषां परोपकृतिपण्डितानां महावीराणामहर्निशमुद्घाटितं द्वारं वर्त्तते समेषां जगज्जन्तूनां कृते ।

---

१. अपराधे २ वृद्धा ३ संशयः

४. शमोऽदर्शने, अन्यत्रदर्शने अेव ह्रस्वः इति मताश्रयणात् ।

५. अग्रगामी

तत्र गन्तुं धनाढ्यानां-अकिञ्चनानां, भूभृतां-रङ्काणां, ज्ञानिनां-अज्ञानिनां, धार्मिकाणां-अधार्मिकाणां, कुलीनानां- अकुलीनानां, सुखिनां-दुःखिनां, सुमनसां-तिरश्चां च तुल्याधिकारोऽस्ति। भ्रातः ! निजाचीर्णान्यधमाधमानि कृत्यानि स्मारं-स्मारं किं खिद्यसे ? तत्र दुःसाध्यानामप्यामयानां प्रतीकारः सम्बोभवीति । देवानुप्रिय ! मन्तूंस्तु जन्तुर्जनयत्येव नात्र नवीनं किमपि । वरेण्यं त्विदमेव गण्यं यद्दोषा दोषरूपतया विज्ञाताः स्युः, चेतस्तान्निराकर्त्तुं च चेष्टेत । तदेहि, तत्राऽऽवां गच्छावः ।"
इत्थं परस्परमालपन्तौ तस्यां दिशि प्रचलेतुः ।

इति श्रीचन्दनमुनि-विरचिते आर्जुनमालाकारे गद्यकाव्ये सुदर्शनस्य मारणाय मालिकस्य मुद्गरोत्तोलनं, श्रेष्ठिनो दृक्पाताद् यक्षस्य तिरोभवनं, श्रेष्ठिना सहाऽर्जुनस्य प्रभुदर्शनार्थ-गमनं—चेत्यादिवर्णनात्मकोऽयं

पञ्चमः समुच्छ्वासः

षष्ठः समुच्छ्वासः

"चिन्त्यो न हन्त ! महतां यदिवा प्रभावः"

—(सिद्धसेन दिवाकरः)

"भगवन् ! तवानन्तवीर्यं विभात्यनन्तचतुष्टये । वचनातीतविषयं तव गौरवम् । त्वदध्यानैकताना हि योगिनो न क्षुधा क्षुभ्यन्ति, न तृषा त्रस्यन्ति, न शैत्येन कम्पन्ते, न तापेन क्लिश्यन्ते, घोरां तपश्चर्यामाचरन्त परमानन्दसुखास्वादं च सेवन्ते । त्रिजगत्पते ! त्वयि तन्मयतामातन्वानास्तनुभृतस्तत्कालमेव दुरधिगमां त्वत्तुल्यकक्षां लभन्ते । विलक्षणं तव सौजन्यं सर्वेभ्योऽप्यन्यदेवेभ्योऽतिरिच्यते । सर्वदर्शिन् ! गतोऽस्मावयोः कालेयखण्डं प्रेयान् सुपुत्रः सुदर्शनस्तवदर्शनार्थम् । परमेष्ठिन् ! बहु निषिद्धमावाभ्यां घातुकार्जुनभीतिभीताभ्यां तत्र गन्तुम्, परन्तु स तु त्वयि पूर्णश्रद्धेयतामादधानोऽस्मद्वचनेन समं समवर्त्तिसाध्वसमप्य[1]-नादृत्य निःशङ्कं त्वत्पूता दिशमनुससार । देव ! शक्षावः किमावां पुनरपि तद्वदनकमलं द्रष्टुम् ? विनयविनता तत्कन्धरा स्प्रक्ष्यति किमुतावयोः क्रमयुगलम् ? विन्यस्तो भावी किमावयोः सव्येतरकरः[2] स्निग्धकेशवेशविलसिते तन्मस्तके ? श्रोष्यावः किमुत पीयूषं स्रवन्ती सलिलवत्सरलां च तन्मुखसरस्वतीम् ? त्वच्चरणकमलकृपया नूनं मङ्गलमाकलयिष्यत्यस्मत्तनुजस्तथापि प्रेमपरिप्लुतं हृदयं नहि स्थास्नु[3] भवति, भगवन्!"—इत्थ भक्तिमोहमिश्रिता विविधकल्पना कल्पयन्तौ स्मारं-स्मारं

---

१. मृत्युभयमपि २. दक्षिणहस्तः

३. स्थिरम

सुदर्शनमश्रुप्रवाहेण भूतलं पल्वलयन्तौ प्रतिक्षणमागन्तुकजनानां सकाशात् तद्वृत्तान्तपृच्छनप्रह्वौ क्षणाद्धर्षं क्षणाच्छोकं अनेकविचारधाराभिराविर्भावयन्तौ सुदर्शनस्य मातरपितरौ गृहे कथंकथमपि समयं यापयाञ्चक्रतुः ।

तावत् क्षणादेव महानन्दकरसन्देशाभिनन्दितः पंफुल्यमानान्तःकरणः कतिपयनागरजनमुखोत्थितो मङ्गलमयो महाध्वनिर्मातापित्रोः कर्णकोटरे प्रविष्टः । "शुभं-शुभम्, मङ्गलम्-मङ्गलं, कल्याणं-कल्याणम्, भद्र-भद्रम् । गतं-गतमरिष्टं नगरस्य । चिरेण नगरमस्तकस्था सघनाऽऽपद्घनाघनपटली वीरदर्शनभक्तिवात्यया प्रतिकूलं प्रेरिता विलीनेदानीम् । न यदुपलिङ्ग[1] चातुरङ्गिकसेनासमन्वितेन श्रीमता श्रेणिकेन राज्ञा प्राशामि, तदेकनैव वीरदर्शनोत्सुकेन वीरभक्तेनाऽप्रहरणपाणिनाऽपि निर्द्वन्द्वमुपशमितम्, पुनरहिंसायाः साकारं चित्रमुपढौकितं जगतां पुरस्तादऽनेन वस्तुवृत्त्या", इत्याम्रेड्यमानं हर्षोत्कर्षितयोच्चकैर्जेगीयमान बहुजनोदितं तुमुलमिवाकर्ण्य सुदर्शनस्य पितरौ कर्णयोराकृष्टाविव- "किमिदम् ? कुत इदम् ? कथमिदम् ? सुदर्शनस्याभिधेयं श्रुतिपटमुट्टङ्कयति ?" इत्थं वावदूकौ गृहाद् ससंभ्रमं बहिरागतौ परीपृच्छ्येतेऽदः-"भो ! भो ! भद्राः ! किमद्भुतमद्यनगरे जागर्ति यदियान् कोलाहलो लोके समुल्लसतितराम्?"

आगन्तुक कश्चित्—नज्ञायते भवद्भ्यामद्यावधि किमिदमपि, भवदन्वयदिवाकरेण यदद्भुतमाचरितम् ?

पितरौ— नहि, नहि, ब्रूहि भद्र ! कर्णामृतं पायय ।

आगन्तुकः—ओ ! असाध्यमवसितमपि साधुतया साधितं भवत्पुत्रेण ।

हर्षपरवशतया पितरौ—विशकलय्य[2] जल्प भ्रातः ! शक्नुवो- यथाऽऽवामप्यवसातुम् ।[3]

तावदनेके दुर्गस्था जना धावमाना सुदर्शनस्य वेश्म निविशमाना "विजयतां सुदर्शनो विजयतां सुदर्शन" इत्याम्रेडयन्तः[4] जनकात्पूर्णानकं[5]

---

१ यदुपद्रव २. विस्तारं कृत्वा

३. ज्ञातुम् ४. पुनःपुनरुच्चारयन्तः

५. पूर्णपात्रं वस्त्रमाल्यादि,

यथा—उत्सवेषु सुहृद्भिर्यद् बलादाकृष्य गृह्यते ।

वस्त्रमाल्यादि तत्पूर्णपात्रं पूर्णानकं च तत् ।। इति—हैमः

झगित्येव जगृहिरे, प्रावोचँश्च प्रमोदमेदुरां वाचम्—श्रुतं किमुत पुत्ररत्नस्यालौकिकं कृत्यम् ? अवगता किमद्यतनी घटिता घटना भवद्भ्याम् ?

मोमुद्यमानौ पितरौ—नहि, पूर्णतया नाकर्णिता।

आगन्तारः—श्रूयतां तर्हि, सकर्णमश्रुतपूर्वो वृत्तान्तः।

उत्सुकतया पितरौ—वाच्यं-वाच्यं सविस्तरं सर्वमविलम्बितम् । पारिपार्श्विका अपि बहवो दमदमिकया सुदर्शनस्यालये सम्मिलिताः । नव्यघटितकथाश्रवणतत्परतया सर्वेऽपि तूष्णीमाभेजुः ।

तेषां विदितवृत्तानामेको वाक्पटुर्ब्रवीति—भगवत्साक्षात्कारार्थं जिगमिषुणा सुदर्शनेन समं वयमपि कौतुकनिरीक्षणदक्षतयाऽऽदुर्गं प्रयाताः।

जनकः—आम्-आम्, अग्रे वाच्यम्—अस्थाम वयं तु तत्रैव, एकाक्येव वीराग्रणीर्भवत्पुत्रोऽग्रे चचाल ।

अन्तराल एवाम्बा—भोः ! भोः ! मत्पुत्रस्य मुखे तदानीं कापि भयरेखा तु नासीत् ?

वक्ता—अलमुदित्वेदम् भीरुकाणां तत्र गमनस्य क्वाऽवकाशः ? ते त्वत्रैव पतिता म्रियन्ते ?

माता—बाढम्-बाढम्, निवेदयाऽग्रे ।

वक्ता—निःशङ्कमायान्तं तमवलोक्य स पापीयानर्जुनो मुद्गरमुत्तोल्याभिमुखं दधावे ।

सरोमोद्गमं माता—तदानीं मदङ्गजेन किमनुष्ठितम् ?

वक्ता—तत्कालमेव भगवद्ध्यानमारब्धम् ।

सर्वेऽपि पार्श्वस्था—हन्त ! हन्त ! तस्मिन् समये भगवद्ध्यानम् ! धन्योऽयं नरपुङ्गवः, धन्यास्य प्रसूः, धन्यमस्य च धैर्यम्।

सवाष्पक्षेपं माता—ततः ततः किमभूत् ?

वक्ता— भगवतां प्रभावतः स मुद्गरं मोटयितुमपि न चक्षमे ।

माता—एवम् ।

पार्श्वस्थाः सर्वेऽपि—धन्यो भगवतामनुभावः, अतएवैते प्रत्यहमर्हन्तमर्हयन्ति सभक्त्या ।

पिता—तदनु का घटना जघटे ?

वक्ता—मुद्‌गरेण सहैव स भूमौ पतितः ।

माता—अहो ! स भूमौ पतितवान् ? न वेद्‌म्यहं तु मच्छिशाव-पीदृक्षाऽगम्या शक्तिः पोस्फुरीति ! अस्तु, पश्चात् ?

वक्ता—न जाने ताभ्यां मिथः किमालपितम्, [1]तेनाऽन्वीयमान-निगमो भवत्सूनुर्भगवद्दिशि प्रतस्थे ।

इति विलोक्यैव वयमत्यन्तं हृष्टमनसो वृत्तान्तममुं प्रचिकट-यिषव[2]स्तत्क्षणं नगर्यामागताः ।

इति सकुशलनन्दनवार्तामधिगत्य जननीजनकौ परमां मुदमा-पेदाते । धन्यवादपुरःसरं तान् जनान् विसृज्य भगवतां तनयस्य च साक्षात्काराय कृताभिलाषौ धार्मिकं यानप्रवरं सज्जीकर्त्तुमाज्ञाशि-ष्टाम् । घनगर्जेवेयं प्रवृत्तिः समस्तेऽपि पत्तने प्रसृमराऽभूत् । सर्वेषां सुधियां मनश्चत्वरेषु विविधचारुभावाञ्चिता सुदर्शनस्य कीर्तिनर्तकी नरिनर्ति स्म तदानीम् । प्रजाऽऽखण्डलोऽप्यवगत्य वृत्तमिदं निरातङ्कं[3] च नगरं पुनरपि पूर्यामुद्‌घोषयामास—"अत ऊर्ध्वं कास्वपि काष्ठासु[4] यदृच्छया गच्छन्तु सुजनाः नहि कापि [5]भीर्जरीजृम्भ्यतेऽर्जुनस्येति" ।

इतो नानायथार्थतीर्थनाथार्थवादैरर्जुनं प्रीणयन्, महापुरुषाणा-मनुत्तरचरित्राणि व्यावर्णयन्, क्षमाशूराणां तितिक्षादक्षत्वमुद्भा-वयंश्च सुदर्शनो भगवतामभ्यर्णमाजगाम । दूरतोऽप्युदयाचलावलम्बि-मार्तण्डमण्डलमिव सपादपीठसिंहासनभासमानं व्यपगतशोकैराश्रयणी-योऽयमित्यावेदयन्त्यामिव सन्ततप्रोत्फुल्लाऽशोकतरुच्छायायां विवृ-द्धच्छायम्, त्रिलोक्यामपीदृक् पारमेश्वर्यं कुत्रापि नास्तीति प्रकट-यद्भिरिव छत्रत्रयैर्विलसद्‌गौरवम् नात्र[6]षदप्यबोधान्धकारप्रसारो-ऽस्तीत्याविर्भावयतेव विभाजालभासुरेण भामण्डलेन देदीप्यमानो-पकण्ठम्, कर्मरजांसि सततं धुन्वानाभ्यामिव चाचल्यमानचञ्च-च्चामराभ्यां वीज्यमानमुखारविन्दम्, आन्तरमलेन सह बहिष्कृत-बाह्यमलम्, अस्नातमपिस्नातानुलिप्तमिव कमनीयकान्तिम्, प्रखर

---

१. अन्वीयमानोऽनुगम्यमानो निगमो—मार्गो यस्य सः ।

२. प्रकटयितुमिच्छवः ।

३. अवगत्य, उभयत्र योज्यम्, चकारस्य समुच्चयार्थत्वात् ।

४. दिक्षु ।   ५. भीतिः ।

तेजसमप्यनुष्णातपम्, शिशिरदीधितिमपि कलङ्कविकलम्, शैलेशीं समीपयन्नपि जडिम्ना वर्जितम्, त्रैलोक्यविभुत्वमाश्रयन्तमपि निष्परिग्रहम्, त्यक्तपद्मासनमपि[1] पद्मासनस्थम् भस्माक्षमालाद्यलक्षितमपि परमयोगिराजम्, करामलकवल्लोकालोकनाटकं विलोकमानमप्यऽविस्मितमानसम्, शान्तिमयम्, ज्ञानमयम्, महोमयम्, गोतमादिगणधरैः क्रियमाणविविधप्रश्नोत्तरम्, कल्पनाभिरकल्पनीयम्, वर्णैरवर्णनीयम्, वचनैरवचनीयम्, साक्षात्कारेणैव मननीयम्, अनन्योपमेयं च महावीरं तीर्थेश्वरं ददर्श ।

सम्पन्ने हि स्याद्वादवादिनः साक्षात्कारे सुदर्शनस्य च जातं रोमाञ्चकञ्चुकितं वपुः । उद्वेलितोऽभूत् महजानन्दसरस्वान् । प्रोत्फुल्लानि खलु हृदयकमलपत्राणि । आहित सद्भावनया योगत्रिकम् । विस्मृतानि सर्वाण्यपि विहितवैमनस्यानि । परित प्रस्फुटिता विशुद्धा वैरङ्गिकी व्यवस्था । मन्दायिता कृत्स्नापि मानसी व्यथा । केवल विभुमयमेव चालोकि ताभ्यां[2] विष्टपं[3] तदानीम् । तत्क्षणमेव सुदर्शन पञ्चाभिगमनानि मयोज्य यथास्थानमागत्य त्रिःकृत्वो विधिवदादक्षिणप्रदक्षिणां विरचयन् सविनयं नमस्कृतिं विदधत् कल्याणमङ्गलादिध्वनिभि साधुवादमुदीरयन् मुखप्रश्न च परिपृच्छन् भक्तिपुर सर प्राञ्जलिपुट सानन्दमित्थं प्रार्थयितु लग्न—"अयिनाथ ! चातुरङ्गिके चराचरे विश्वे संसरतां ससारिणा त्वमेव शरणमसि । अनाथानां योगक्षेमकर्त्ता त्वमेव नाथोऽसि । अधमोद्धारविरुद त्वमेवावहसि । करुणाकर ! त्वत्करुणयैव दुर्जना सज्जनतामर्जयन्ति । पापिष्ठा धर्मिष्ठता स्पष्टयन्ति । अज्ञानिनो ज्ञानजुषो जायन्ते । मिथ्यात्विन सम्यक्त्वमासादयन्ति । नास्तिका आस्तिक्यं हस्तयन्ति । त्रिकालज्ञ ! त्वया किमप्यनवसित नास्ति, यदस्माभि किञ्चनापि शुभमशुभमाचर्यते । अस्मन्मनस्युत्पदिष्णव सर्वेऽपि सकल्पास्त्वयि स्फटिकवत् प्रतिभान्ति । अस्मदिन्द्रियग्रामस्योत्पथगामित्वं त्वदस्फुट नास्ति । प्रभो ! तथा कामपि सरिणी निर्देशय यथा करणान्त करणयो[4] वशीकारप्रयोगः स्यात् ।

---

१ त्यक्त पद्माया—कमलाया आसन येन, निष्परिग्रहत्वात् तथापि विरोधाभासे पद्मासनस्थम् ।

२. भावितम् । ३ भुवनम् ।

४ इन्द्रिय-मनसोः ।

हे तीर्थप्रवर्त्तक ! यो मया सार्धमागतोऽर्जुनमालाकारः कुदेवार्चकोऽसम्यग्दर्शी विद्यते। कृपालो ! अनेन हिंसाद्यास्रवाऽनभिज्ञेन कुदेवसेवितया रोषपारतन्त्र्येण च निबिडः पाप्मोचितः[1]। पञ्चमासत्रयोत्रदशवासराणि यावद् वशासप्तमाः[2] षट् पञ्चजनाः[3] निःसंकोचं जीवनाशं नाशिताश्च। करुणामूर्ते ! साम्प्रतमयं विभोरतिशयेन जागरूककरुणः स्वात्मना विरचितादारुणादेनसः[4] सकाशाद् वेपते, स्मारं-स्मारं तद् भृशं ग्लानिमनुभवति, वष्टि च गर्हिताचरणस्य प्रायश्चित्तमपि। भवगदस्यामोघाऽगदङ्कार ! अस्य मृतप्रायस्य च्युतजीविताशस्य "जीवातुस्त्वदृते[5] कोऽपि नहि जागर्ति जगतीतले। देव ! अतो बद्धसंकल्पो दृढनिश्चयोऽयं त्वामेव शरण्यं मत्वा मया सार्धं समागतवानस्ति। पतितोद्धारक ! अत एवाहं प्रार्थयेऽमुमत्राणं त्रायस्व, अस्याऽसहायस्य सहायतां विधेहि, देहि चास्मै निराश्रयाय चरणारविन्दे पदम्। एतदेवास्ति कार्यं भवादृशाम्।"

इत्थं विनयभारसंभृतां सत्यामात्मनीनां सुदर्शनस्य विज्ञप्तिमाकर्ण्य प्रावृट्पयोदध्वानप्रतानसोदरया नानाभाषापरिणमनस्वभावया भूरिशंसयापनोदक्षमया चेतोहारिण्या वाचा वाचंयमानां विभुः प्रोवाच-—"देवानुप्रियाऽर्जुन ! धैर्यं धेहि, विश्वसिहि, तुभ्यं निर्देक्ष्याम्यहं शान्तेः पन्थानम्। कुसंस्कारवशंवदतया प्रायो जायन्ते एवात्मसकाशाद् अकृत्यान्यपि कृत्यानि, तत्कर्तनोपाया अपि चिरन्तना बहुशो विद्यन्ते, ब्रूहि, किं जिज्ञाससे ?"

तावदनेकैर्नागरिकैरहपूर्विकया समागतैः विस्मयमानमानसैः स्मयमानाननैः परिपूर्णाभूत्तत्रभवतां परिषद्। तेषां समक्षं करौ सम्पुटीकृत्य शिशुवत्सारल्यमाश्रयन्नर्जुनः सविनयं प्रश्नयाञ्चकार—"भगवन् ! [6]किंकारणानि दुःखानि ? कारणानां च कुतः प्रादुर्भावः ? कथं पुनस्तेषां निरंशो नाशः ? त्रिकालवित् ! आत्मा कथं पापमुपचिनुते ? कथं तत्र वृत्तिः साहाय्यमाददीत ? पापेभ्यो निवृत्तिः कथं जायते ? कथं च निर्वृतिमाप्नुयात् ? इत्येव जिज्ञासुरयंजनः, कृपां कुर्वतां कृपालवः।"

---

१. पुल्लिङ्गोऽयमन्नन्तः। २. वशा सप्तमी येषाम्।
३. षड् मर्त्याः। ४. पापस्य।
५. जीवनौषधम्।
६. किं कारणं-निदानं येषां तानि किंकारणानि।

अल्पाक्षरमपि बहुसारगर्भितम्, बाह्यवाग्वर्गणापुद्गलजन्यमप्य-न्तस्तलस्पर्शि, विविधभावभङ्गिदिग्धमप्यसंदिग्धम्, घनरसवदकर्कशमपि मिथ्यात्वमहाद्रिभेदक्षमम्, ऐदम्पर्यविलक्षणमपि सम्पन्नकारकादिलक्षणम्-साधारणजनवेद्यमपि गूढतत्वम्, सरलं, सुग्रहं, सुमधुरं च भगवान् प्रत्युत्तरमर्पयामास—"विलोक्यते चेद् वास्तविकतया दुःखपरिपूर्णोऽयं ससारः। जन्मजरामरणप्रभृतीनि प्रभूतानि स्पष्टानि कष्टानि। भौतिकसुखान्यपि परिणतिविरसत्वात्सुखाभासान्येव। ससारिणः प्रतिपलं दुःखदावे दंदह्यन्ते सासह्यन्ते च विविधाधिव्याधिविसंस्थुलाः कृच्छ्रपर-म्पराः। मुख्यतया दुःखकारण तु तृष्णैव। तृष्णापि च निदानानां भेदै-र्भिद्यमाना बहुरूपा निरूप्यते तत्त्वज्ञैः। यथा केचन विभवाभिलाषिण, कतिचन कामभोगकाङ्क्षिणः, केचित् पुत्रादिपरिकरकामयितारः, कतिचनऐश्वर्यमिच्छवः, इतरे यशोभिलाषुकाः, परे सम्मानाऽन्वेषिण., अपरे च स्वास्थ्यप्रार्थिनः, किं बहुना, नानावस्तुजातगृध्नुतया तृष्णाऽपि नानारूपेण जनान् दुःखाकरोति, भ्रामयति, खेदयति, पीडयति, चिन्त-यति[1] मारयति च। हन्त ! इयं सर्वभक्षा तृष्णा राक्षसी कुत्राऽपि तृप्तिं नाञ्चति। लाभेऽपि लोलुभा मुखं विस्फारयति, सुज्ञानऽज्ञानगर्तेऽर्त्त-यति, विरागार्हान् भवरङ्गाङ्गणे नर्त्तयति, अत्रस्तान् त्रासयति, अनष्टान् नाशयति, दृढव्रतान् भ्रंशयति, सुन्दरसंकल्पान स्रंसयति, धैर्यधौरेयान् ध्वंसयति च। यावन्तोऽनर्था जन्यन्ते[2] जगत्यां ते प्रायस्तृष्णाविस्फूर्जि-ता एव। ये ये वीरपुरुषान् जुह्वतो[3] महाहवा भवन्ति भूतले, ते कृत्स्ना अपि तृष्णातर्पणायैव। ये ये ग्रसितन्यायवादा विवादा उद्बुध्यन्ते तेऽपि स्वस्वमनोरथरथाऽऽरोहणायैव। ये ये च धर्मनाम्ना बोभूयमाना उपप्लवास्तेऽपि च स्वार्थान्धतयैव। अस्तु, तृष्णैव दुःखकारणम्, तृष्णैव-कृच्छ्रभाजनम, तृष्णैव दुःखमूलम्, येषामुच्चलोच्चयमुन्मुच्य[4] प्रचलिता तृष्णाचमूरी[5] तेषां सर्वत्रानन्दलहरी परिस्फुरति। तेषामुदासीनवृत्ति-तया मुदाऽऽसीनानां प्रतिपदं निधानानि चकासति। उपेक्षादक्षाणां तेषां सर्वत्राऽपि ब्रह्मसाक्षात्कार.। मानापमानयोर्हर्षविषादयो सुख-

---

१. चिन्तां कारयति　　　२ जनै इति कर्मणि प्रत्ययत्वात् अध्याहार्यम्

३. जुह्वत् जुह्वतौ जुह्वत प्रथमाया बहुवचनम् किं भूता महाहवा. वीर-पुरुषान् जुह्वत.।

४. चित्तरूपगिरिम्　　　५ मृगभेदा

दुःखयोर्जीवनमरणयोश्चतेषां साम्यम् । अनासक्तिभाजां तेषां जीवतामपि सिद्धिसौख्यलेशोऽत्राप्यवभासते ।

तृष्णोत्पत्तिस्तु पूर्वविहितकर्मसंस्कारजनिता । सम्यग् ज्ञानद्वारा हि तृष्णाया निरंशो नाशः । यथा-यथा चैधते तृष्णा तथा-तथा देहिनः पापवृद्धिरवश्यं भाविनी, जातायां च पापवृद्धौ चेतनाऽष्टमृत्तिकालेपानुलिप्ता तुम्बिकेवाऽधोऽधः प्रयाति । आश्रवस्तत्रसाहाय्यमाचरन् स्वभावादुद्गच्छन्तमप्यात्मानं भवाऽगाधगर्ते पातयति । पुण्यपापोत्थिते सुखदुःखे चिरमनुभवन् प्राणी चतुरशीतियोनिलक्षेषु कुलालचक्रवद् भृश परिभ्रमति ।

यदा च संवरेणाऽऽगच्छन्ति कर्माणि संरुध्य पुनर्बद्धानि च निर्जरया जर्जरीकृत्य सर्वाणि निरन्वयानि पुण्यपापरूपाणि कर्माणि समूलकाषं कषतितमाम् तदैकेनैव समयेन वह्निशिखावद् एरण्डबीजवद् वा स्वभावोर्ध्वगतिर्बन्धनमुक्तः सर्वदुःखक्षयं महोदयमासादयति नूनमात्मा । तत्राजरामरानन्ताक्षयाऽव्याबाधादिविशेषणविशिष्टान्याध्यात्मिकसुखानि साद्यनन्तभङ्गेनाङ्गीकुर्वन् सर्वलोकमस्तकस्थः शाश्वतः सिद्धो भवति ।

इति श्रीचन्दनमुनि-विरचित आर्जुनमालाकारे गद्यकाव्ये
सुदर्शनपित्रोर्विलपनं, पुत्रस्य शुभसन्देशश्रवण, सुदर्शनेन
सहाऽर्जुनस्याभिगमनं, नानातिशयाऽतिशयित-
प्रभोरवलोकन, स्तुतिगर्भमर्जुनस्य कथाविस्तारणं, प्रश्नपृच्छनं, प्रभोरुत्तरण
चेत्यादिवर्णनालङ्कृतः
षष्ठः समुच्छ्वासः

सप्तमः समुच्छ्वासः

याति घनापि घनाघनपटली, खरपवनेन विरामम् ।
भजति तथा तपसा दुरितालिः, क्षणभङ्गुरपरिणामम् ॥
विभावय विनय ! तपो-महिमानम्

—(शान्तसुधारसे)

अनन्तशक्ति-भृदात्मा कर्ममलाविलत्वेन स्वरूपं विस्मृत्य पर-रूपाच्छन्न सन् स्वं शक्तिशून्यमन्वानो भवाटव्यां भ्रमति । हरिरिव यदा स्वरूपं प्रत्यभिजानीते तदा जडात्मनामेषां कर्मणां विनाशे को नामातिशयः ? द्रष्टा तु नयननैर्मल्यादिगुणसमन्वितः स्वयं पुमान् तथापि सूर्यालोकमपेक्षत एव, तथैव कर्त्ता हर्त्ता तु स्वयमात्मैव परन्त्वालोकितात्मानां महापुरुषाणां साहचर्यमपेक्षणीयमेव ।

अस्तु, निशम्याथ चतुरस्रविवेचन-विकचम्, परिस्पन्दमानोपशम-रसौतप्रोतम्, विलसदतुच्छप्रशस्यरहस्यविशदम्, हृदयपरिवर्त्तन-क्षमम्, अनवरतनिजाचरिततया विततप्रभावम् विभूनां वाङ्मयं स्फुर्जद्वैराग्यगर्जनोऽर्जुनः परमां शान्तिं, परमां मुदं, परमां संविदं चावाप । अनुगर्जं यथा केकी चोकूयते तथैव विभुवचनामृतं निपीय तोष्टूयमानः समम्मदमित्थं[1] निवेदयामास- "पारगत ! त्वदुपदेश-पीयूषं कर्णेहत्य निपीय प्राप्तचेतनोऽहं जगज्ज्वालानो निजात्मान-

---

१ सहर्षम् ।

मुद्धर्तुकामः भागवती दीक्षां कक्षीकर्तुमुत्सहे। पर्जन्यधारासार-जन्यो हि दावानलोपशमो नहि परोलक्षघटोदकसेकसाध्यः। मादृश-स्याततायिनोऽवनं नह्यणुव्रतोररीकरणेन सम्भवि, किन्तु महाव्रता-न्येव मत्कल्पितकल्कानि[1] क्षिप्रमल्पयिष्यन्ति, नात्र संशयः। यत्करणीयं तद् युगपदेव भावद्रढिम्ना करणीयम्। स्तोकं-स्तोकं कुर्वतां मन्थराणां नहि तादृशाऽऽनन्दोपलब्धिः। अतो विश्वतारक! पतित-पतितं अधमाधमं नरकगमनार्हं निन्द्यचरितमेनं शरणाश्रितं करौ धृत्वोद्धर! देव! मादृशामुद्धारे हि दीनोद्धारधुरन्धरत्वं परमकारुणिकत्वं च तवाविर्भावि। उदारचरितानां भवेत् किं कुत्रापि दृग्वैषम्यम्? विलोकते किमुतासारधाराभिर्वर्षन् उच्चावचं स्थलं परोपकारी जलमुक्? आलोकयन्नखिलमपि जीवलोकं हेली[2] नावलोकयेत् किम-वकरादीन्? परमेश्वर! त्वया मादृशा अनेके पापीयसां पुरोगा भव-पारावारात्पारं प्रापिता। मदुद्धारे तव किं काठिन्यं वर्तते? अतोऽ-ह्नायैनं[3] गृहाणाऽन्तेवासितया, देहि द्रागेनमपि मुनिमण्डल्या पदम्, जगद्गर्हणीय जगदर्हणीयतां च प्रापय।" भक्तिशक्तिनिभृतां श्रुत्वाऽ-र्जुनस्य विज्ञप्तिं पुनरपि स्वयंभुवोऽचकथन—"अर्जुन! त्वं मदन्तिके नैर्ग्रन्थी दीक्षां जिघृक्षसि? साम्प्रतमेषा तव भावना तु निर्भरं भव्या, परन्तु प्राक् पूर्णतया परामृष्टव्यम् यत्साधुत्वमसिधारावलेहनमिव, गुरुतरायो[4]वीवधस्वांसनिर्वहणमिव, शैलशिखरवर्षद्बलाहकसलिलवे-गोत्पाटितकूलाया कल्लोललोलावर्त्तशतसङ्कुलायां शैवलिन्यां[5] प्रति-स्रोतस्तरणमिव, सिक्थकमयरदनैर्लोहचणकचर्वणमिव, लक्षयोजन-विस्तृतस्य मेरोरङ्गुल्यग्रोत्तोलनमिव, नीरसबालुकाग्रासवल्भनमिव, दुर्निर्वहं, दुःसाध्यं, दुष्करं च वर्वर्त्ति। नात्राल्पसत्त्वानामधिकारः, ते तु साधुत्वनाम्नैव बिभ्यति, वेपन्ते, पलायन्ते च। इदं तु शौर्यपूर्णै वैराग्यरागरक्तैर्भीषणपरीषहजेतृभिर्वीतविषयवासनैः पर्युपास्यं, ग्राह्यं, नेयं, श्रेयं च।"

"ये च बाललीलावल्लघु किमपि क्षणिकमावेगमाभेजाना, संयमाय-स्पृहयुस्ते कामप्युदीयमानां कष्टपरम्परां वीक्ष्य संयमे शैथिल्यमाव-हन्तः श्रान्ताः, उद्विग्नाः, भ्रष्टाः, पथिच्युताश्च जायेरन्। वेषे नहि काऽपि विशेषता वर्त्तते, विशेषता तु वासनाविनाशे, तपस्तल्लीनत्वे,

---

१. मद्विहितपापानि। २. सूर्यः।

३. मङ्क्षु। ४. "अयोवीवधः"—लोहभारः। ५. नद्याम्

स्वतन्त्रमात्ममन्दिररमणे च अतः संयममादित्सुना नरेण पूर्वं दृढ़-संकल्पवता भाव्यम् ।" इत्योजस्विनीं वीरतां वर्धयमानां वर्धमानस्वामिनः शिक्षां कुसुमीकृत्य साहसैकमूर्त्तिरर्जुनः सावष्टम्भं व्यजिज्ञपत्—"तीर्थेश ! भगवतां सूचनाऽक्षरशः समीचनतामञ्चति । नहि शैशवी क्रीडा संयमस्योरीकृति[1]रित्यहमपि मन्ये, श्रद्दधे, प्रत्येमि च, किन्तु मदीयमन्तःकरणं तु सुदृढं, सुस्थिरं, सुसज्जं, सावधानं च विभाति। भीरुकभावस्तु पार्श्वतोऽपि नहि परिसर्पति । जगन्नियामक ! मादृशस्य दग्धहृदये क्व दुर्बलता प्राप्नुयादवकाशम् ? कर्मठः[2] प्रायशो धर्मसंलग्नवृत्तिर्नहि जातुचिदपि तत्र घटयति शाठ्यम् । नाथ ! किं बहु वच्मि ? तव कृपया प्राणानपि त्यक्ष्यामि किन्तु गृहीताभिग्रहात्पदैकमपि नहि चालयिष्यामीतस्ततः ।" इत्थं तस्य पूर्णदार्ढ्यं जानानैर्जगद्गुरुभिरित्याज्ञप्तम्—"यथा सुखं कुरु, मा विलम्बस्व" । इत्थं भगवताऽङ्गीकृतोऽमन्दानन्दाऽभिनन्दित सुदर्शनादात्तावाचंयमोचितोपधिः परमशान्तरसस्नात प्रव्रजितुकामोऽर्जुन करौ कुड्मलीकृत्य भगवतां सम्मुखमुत्तस्थौ ।

गन्धवहेन सार्धं यथा परिमल प्रसरति वायुमण्डले तथैव कर्णाकर्णिकयाऽर्जुनस्य दीक्षाया शुभसंवादोऽपि पत्तने प्रसृत । आकर्ण्य चित्रकरं वृत्तमिदं कुत्रापि द्वित्राः, क्वापि पञ्चषा, कुहापि सप्ताष्टाश्च जना[4] संभूय स्थिता मिथो निगदन्ति—

अरे ! रे!!श्रुतं वा न श्रुतम् ?

परः—किम्-किम् ?

पूर्व—अद्याऽर्जुनमालाकार उपमहावीरं भागवती दीक्षां भिक्षते ।

परः—ह ! ह ! ह ! दुष्टोऽर्जुन ! जगज्जिघांसुरर्जुनः ! मिथ्या-मिथ्या, वडवा प्रसूता कस्यचिदसमये ।

पूर्वं—ओः ! प्रत्यक्षे किं प्रमाणम् ? गच्छामो वयमधुनैव पश्यामोऽर्जुनस्य प्रव्रजनम् । इत्थं विवदमाना उत्कलिकतया सत्वरमङ्घ्रिपातं प्रतस्थिरे भूरयो भद्राः । झटिति संकटाऽभूत् तीर्थपतेर्घटा[3]पौरपटलैः ।[4] मूर्त्तमिव सात्त्विकरसं प्रत्यक्षमिवोपशमं मालाकारं लोकं-लोकं[5]

---

१. अङ्गीकरणम् । २. कर्मशूरः । ३. परिषद् ।
४ जनसमूहै । ५. दृष्ट्वा-दृष्ट्वा ।

समेऽपि लोका अलौकिकमाश्चर्यमासदन् । अहह ! अचिन्त्यशक्तिभृद-हिंसादेवी ! ईदृगसम्भवि परिवर्त्तनम् । आततायी नरोऽपि तायी[1] असहनोऽपि सहनः,[2] निष्कृपोऽपि सकृपश्च समजनि ।

अथ कृतपञ्चमुष्टिलुञ्चनमर्जुनं प्रव्राजयन्तो भगवन्तो यावज्जीवं करणत्रिक-योगत्रिकैः सर्वान् सावद्ययोगान् प्रत्याख्यापयन्ति । अष्टादश-प्रकारेभ्यः पापेभ्यो निवर्त्तयन्तः समितिपञ्चके गुप्तित्रिके च साव-धानतां दर्शयन्तः सामायिकं चारित्रं प्रापयन्ति, दशविधयतिधर्मेषु सुदृढं स्थापयन्तिच । अनगारधर्मं प्रतिपद्याऽथार्जुनो मुनिः शान्तो दान्तो-ऽकिञ्चनो ब्रह्मचारी कषायमुक्तश्च षष्ठषष्ठेनानिक्षिप्तेन तपसाऽऽत्मानं भावयन् चाऽभिग्रहं जगृहे—"अत ऊर्ध्वं ये केऽपि परीषहा अनुलोमा-प्रतिलोमा वा उत्पत्स्यन्ते तान् सर्वान् सम्यक् सहिष्ये, क्षमिष्ये, ज्ञान-दर्शनचारित्रमये मोक्षमार्गे रममाणः सफलं समयमतिवाहयिष्ये पुनः ।

इति प्रतिज्ञायाथार्जुनमुनिर्विनयं श्रुतं चाभ्यसन् स्वाध्यायं ध्यानं च प्रणयन् यदा षष्ठभक्तपारणाय तृतीयपौरुष्यां भगवदाज्ञया भिक्षार्थी राजगृहं प्रयाति, तदा केचन जना तमवलोक्य विहितविवेकलोपेन कोपेन-परायत्ता जनितप्रियवियोगबृहद् भानुज्वालाजाज्वल्यमानास्तादात्त्विक[3]-तद्दर्शनाऽविर्भूतविद्वेषा निगदन्ति स्म, सथुत्कारमिदम्—'धिग्-धिग् ! पश्यन्तु पश्यन्तु ! आगतोऽसौ लिङ्गवृत्तिरर्जुनः[4] पापीयान् । हन्त ! अनेन दुष्टेन मे परमाह्लादजननी जननी दीर्घनिद्रया[5] विद्राविता ।

अन्यः—अरे ! अनेनैव नीचेनास्मदन्वयाऽऽतपत्रायित पिता पञ्चत्वं प्रापितः ।

इतरः—न विज्ञायते किमु हा ! मम परमवत्सलो बाहुतुल्यो भातृ-भानुर्ग्रसितोऽनेनैव राहुणा !

अपरः—ओः ! प्रेतवनमिव शून्यमस्ति सदनं मनश्च मम प्रेयसी-वियोगादस्यैव दुष्टस्य निःशूकतया ।[6]

परः—बत ! बत ! हन्त ! हन्त ! अनेनैव हतकेन मम गृहमणि[7]रे-काकी प्रेयान् ललितालको बालको घातित ! तत्सङ्गशून्यमुत्सङ्गं मम

---

१. रक्षकः ।	२. क्षमावान् ।
३. 'तात्कालिक' ।	४. धर्मध्वजी ।
५. मृत्युना ।	६. निर्दयतया ।
७. दीपः	

निर्ज्योतिश्चक्षुरिवाऽसुन्दरमाभाति । अरे ! रे ! नीच ! पापिष्ठ ! शठ ! तव किमपराद्धं दुग्धमुखेन मुग्धेन मच्छिशुना ? हा ! हा ! किं करोमि ? क्व यामि ?

इत्थमनेकधा पूर्वविहितविरोधमुद्भावयन्तो विषादमासादयन्तोऽर्जुनर्षिं गालीदानैरवहेलयन्तः कर्णकण्टकायितया कर्कशगिरा अवभर्त्सन् । केचन विरुद्धसंशनेन¹ सह जरठलेष्टुक्षेपमतीतडन् । कतिचन रदच्छदान् दशन्तो यष्टिमुष्ट्यादिभिरवधिषुः सकोपम् । इतरे चञ्चच्चन्द्रहासेन निर्दयं प्राहार्षुः । अपरेऽत्यन्ततेजितलवित्रघातेन रक्तधाराभिरसिष्णपन्²। अन्ये सनिष्ठीवनिक्षेपं न्यगकार्षुः । कतिपये पङ्कादिलेपैरलिपन् । किं बहुना, बहवो मनुष्या बहुधा वैरं स्मरन्तः प्रतिशोधमनैषुः ।

केचित्—ज्ञातं-ज्ञातं ! तव साधुत्वमरे ! निष्ठुराशय ! खलु परोलक्षनाखून् विनाश्य मार्जारः केदारकङ्कणमाधाय तीर्थयात्रायै प्रवृत्तः । इतस्ततो भ्रमितुमशक्तेन वृद्धनखरायुधेन³ अपराऽरण्यानां विप्रतारणाय निरामिषभोजित्वं व्रतमङ्गीकृतम् । रे कपटघटापटो ! अत्यन्तमिष्टशर्कराम्भसा सिक्तोऽप्याम्रायते किमुत निम्बः ? गङ्गास्नातोऽपि गर्दभो जाजायते किं किलाऽऽजानेयः⁴ ? हरिचर्मावृतोऽपि पारीन्द्रायते⁵ किमुत गोमायुः ? दम्भिन् ! किमु विश्वं वञ्चयसे ? किं दम्भचर्यया मुग्धान् विप्रतारयसे ? जातं तव वैराग्येण, अलं तव तपस्यया, अस्तु तवाऽस्तिक्येन, भवतु च तव सयमभारेण ।

इत्थमनल्पमाक्रोशतां मानवानां गर्हणां, निर्भत्सनां, ताडनां, छिदां, भिदां चाकलय्यार्जुनस्तपोधनः केवलां भगवच्छिक्षां लक्षीकृत्य नहि किञ्चिदपि क्रुध्यति, खिद्यते, त्रस्यति, बिभेत्युद्विजते च, प्रत्युत सहिष्णुतया हृदये विभावयति स्म—"अहो ! अमीषां नागराणां मया भृशमनिष्टमाचरितम्, निर्दयममीषां प्रेयांसो दायादा दिष्टान्तं दर्शिताः महती क्षतिं प्रापिताः, पूर्णपाशविकबलेन चोपद्रुताः । अतश्चेदेते मह्यं क्रुध्यन्ति, द्रुह्यन्ति, मामाक्रोशन्ति, ताडयन्ति, मारयन्तीति किमनुचितमाचरन्ति ? उप्तबीजं तु भवत्येवाङ्कुरितम् । बीजानुरूपं हि फलं किमारेकणीयमत्र ? आत्मन् ! हास-हास, रोदं-रोदं वा ऋणं त्ववश्य⁶देयमेव, तदानीमानृण्यमिच्छता हसित्वैव दातव्यं, नहि सवा-

---

१. विरुद्ध सशन गालिः
२ स्नपयामासुः
३. वृद्धसिहेन
४. आजानेयः कुलीनोऽश्वः
५. सिंहायते
६. कृत्येऽवश्यमो लोपः

ष्पक्षेपम् । नूनमेते तु केलिगर्भकोमलान्तःकरणाः सन्ति यन्मदाचीर्णं दुराचाराऽपेक्षया क्षोदिष्टमेव दण्डं व्यापिप्रति[1] । हा ! हा ! मदपराधास्तु रेणुकणैरपि बहुसंख्याकाः, अञ्जनगिरेरप्यसिताः सागरोपमैः कालैरपि दुर्भोग्याः सहस्रधा जीवमार मारणैरपि च दुस्ताराः सन्ति ।

अहह ! एते तु मम परममित्राणि वर्तन्ते । सौहार्द न कथं हृदा श्लाघनीयमेतेषाम् । यतस्तोकेनैव कालेन महामलीमसं मां गर्हणाताडनभेदनैर्निर्मलीकर्त्तुमीहन्ते । भूरितमं मामऽघभार लघूकर्त्तु[2] यतन्ते । उत, किं नवीनमस्त्यत्र ? मन्थानेन मथितादेव दुग्धाद्धविराविर्भावः । शाणोत्कृष्टा एव मणयो महीपतिमौलिमलंकुर्वते । तीव्राऽऽशुशुक्षणि[3]तापतातप्यामानं हि तपनीय[4] नैर्मल्यमालिङ्गति । उत्खातादेव भुवस्तलाच्छशिकरनिकरधवल सलिलमुन्मीलति । अहो ! क्षमैव मुमुक्षूणामलङ्कारः, क्षमा हि भिक्षूणाममोघ शस्त्रम्, क्षमा हि तपसा दुर्बलस्य महाबलम् । अदभुतम् ! क्षमा तु नाम्नैव सर्वंसहा, क्षमा त्वभिधयैव भूतधात्री, क्षमा तु प्रत्यक्षेण रत्नगर्भा, क्षमा ह्यचला, क्षमा ह्यनन्ता, सर्व हि चराचर क्षमाश्रितमेव विराजते । अतोऽहमपि क्षमामाश्रये, भक्त्या सेवे, मुदा पर्युपासे च । पुनः शरीरस्य यातना नहि चिन्मयस्याऽऽत्मन. । शरीरसाहचर्यादेवाह सुखी दुःखीति जीवोऽनुभवति । वपुःपञ्जरेऽवरुद्धः शकुनिरिवाऽसुमान् कालबिडालेन सन्निधीयते । अपरथा शरीरपञ्चकोन्मुक्तः स्वरूपेणाऽसौ निरुपाधिकः अजराऽमरोऽनन्तः चिदरूपश्चिदान्दो नित्य नन्दतितराम् । देहपञ्जरस्य खलु दौर्बल्ये जायमाने मम का नाम क्षतिः ? परायत्तता हि प्रतिपल भयावहा । एते महाशया मां क्षिप्रं स्वाधीनता दर्शयिष्यन्ति, कथं नैनान् महामान्यानहं सम्मान्ये ? प्रेमपवित्रेणाऽक्ष्णा च निरीक्षे ।

इतीव बहुविधं नानाविशदविचारधाराभिरात्मान, प्रीणयन्, निकृष्टेष्वपि श्रेष्ठत्वमन्विष्यन्, कटुकेऽपि मिष्टत्वमाकर्षन् कोपास्पदेऽपि शान्तिमनुशीलयन्, विषादेऽपि च प्रसादमारोपयन् नगरे परिबभ्राम प्रतिवचनं तु दूरमास्तां भ्रूभङ्गमपि नारोपयति स्म भालस्थले ,साम्यमेव परिशीलयति स्म सः ।

---

१. बहुवचनम् २. च्वीप्रत्ययान्तः

३. आशुशुक्षणिरग्निः ४. स्वर्णम्

केचिद् पूर्वार्जितमुर्जितमपि मन्तुं विस्मरन्तो वार्त्तमानिकमुनिधर्माऽवलम्बित्वमाद्रियमाणाः प्रेक्षावन्तः सहर्षं प्रणिपेतुः, ससत्कारं भिक्षामपि च ददुस्तत्राप्यसौ मुनिर्नहि वन्दमानानऽक्षिस्पन्दनैरानन्दयामास, किन्तु रागद्वेषौ व्युदस्यन् "सर्वे भद्राणि पश्यन्तु" इत्येव चित्ते विभावयन्, चेतनस्य वपुषश्च पार्थक्यं वितर्कयन्, धर्मशुक्लादिध्यानमाध्यायश्च निर्मलं संयमं पालयाञ्चकार ।

अनया पद्धत्या घोर तपस्यतः, पानीयमाप्नुवन् भक्तमनाप्नुवतः, भक्तमासादयन् सलिलमनासादयत, भीमान् परीषहान् मर्षयतः, उदारां विचारधारामातन्वतः, आत्मनि पारमात्म्यमनुभावयतः, ध्यानाग्निना भीषणान्यपि पापानि भस्मसात्कुर्वतः, प्रतिपलमात्मनो वैशद्यं च प्रकटयतो महामुनेरर्जुनस्य शनैः शनैर्बाह्या आन्तराश्च सर्वेऽपि क्लेशा नामशेषतामगमन् ।

षाण्मासिकं दीक्षापर्यायं प्रतिपाल्य, प्रान्तेऽर्धमासस्य यावज्जीवमनशनमादृत्य, भावोत्कर्षतया क्षपकश्रेणिमारुह्य, मोहमहामल्लं द्वादशगुणस्थानस्यादौ निपात्य, त्रयोदशगुणस्थानमुखे त्रीण्यवशिष्टानि च घनघात्यानि कर्माणि प्रोन्मूल्य लोकालोकभासुरं समस्तद्रव्यपर्यवसाक्षात्कारदक्षं केवलज्ञानमाससाद । तदनन्तरमेव सूक्ष्मक्रियमप्रतिपातिन शुक्लध्यानस्य तृतीयं भेदं ध्यायन् मनोवाक्काययोगानां प्राणापानयोश्चक्रमशो निरोधं विधाय ईषत्पञ्चह्रस्वाक्षरोच्चारणकालेन समुच्छिन्नक्रियमनिवृत्तिनामकं शुक्लस्य तुर्यं भेदं भजमानः चतुर्दशगुणस्थानमारूढः शैलेशीमनुशील्य शरीरत्रिकं च परिहाय ऋजुश्रेणि प्राप्तोऽस्पृशद्गतिरेकेन समयेन साकारोपयुक्तो निर्वाणमवाप । अष्टकर्मणां क्षयाल्लब्धैर्ज्ञानदर्शनात्मिकसुखाद्यष्टसिद्धगुणै शोभितोऽपुनरागतिर्निस्तुषशालिकणवद् अपुनर्जन्माऽक्रियोऽनन्तः सिद्धो बुद्धो मुक्तश्च बभूव ।

इति श्रीचन्दनमुनि-विरचित आर्जुनमालाकारे गद्यकाव्ये-भगवदुपदेशमाकर्ण्य मालिकस्य दीक्षोरीकरणं, साभिग्रहघोरपरीषहसहनं शुभभावनया कर्मवंश-निर्मूलनं—मुक्तिगमनमिति-प्रपञ्चाऽञ्चितः सप्तमः समुच्छ्वासः

काव्यकर्त्तुः प्रशस्तिः

दुःसाध्यमिथ्यात्वगदापहारी, परोपकारप्रवणः पटीयान् ।
अलोलुभोऽथाऽनुभवी यशस्वी, भिषग्वरो भिक्षुविभुर्बभूवान् ॥१॥

शिष्यस्तदीयोऽजनि भारिमालो, गुणालयो राजशशी तृतीयः ।
